सती पतो हैं दिलसुखराम । पुत्र उन्हीं के आशाराम ।।
कलियुग में गोविन्दी देवी । सती भई हैं जिन जिन सेवी ।।
तिनके पूरण हों सब काम । हृदय राखिये दिलसुख राम ।।
सती शिरोमणि गोविन्दी जी । अस्तुति करों चरणवन्दी जी ।।
माता ध्यान हमारो कीजै । संकट सबरोई हर लीजै ।।
सती मातु खिरसौली वारी । हम पर कृपा कीजिये भारी ।।
श्रीवनमालिदास कवि गावैं । कहैं सुनैं ते सब फल पावैं ।।

अमृतजयन्ती महोत्सव :—

अक्षयतृतीया २०२९

पूज्यपादगुरुदेववराणां, वन्दनीयललिताचरणाम् ।
प्रेरणासितसुबन्धुवराभ्यां, सुप्रसाद-हरिशंलललिताभ्याम् ॥१॥

वेद-वाण-नव-चन्द्रमितेऽब्दे, ललितहार-राधारमणस्य ।
साध्वकारि शुभमूर्तिप्रतिष्ठा, यथा तयोः प्रथिता शुभनिष्ठा ॥२॥

नन्दाक्षि-शून्य-करसम्मितविक्रमाब्दे, वैशाखमासि शुभशुक्लवरे च पक्षे ।
पादोनवीत-शतसंख्यवर्षमेऽब्दे, संजायतेऽमृतजयंतिमहात्सवोऽयम् ॥३॥

गोस्वामिवर्यो गिरिधारिलालो, ह्यध्यक्षरूपेण विराजतेऽस्मिन् ।
तस्यैव सत्प्रेरणया महोऽयं, सुनिश्चितः संचलतीह सम्यक् ॥४॥

तदर्थं श्रीमन्तः सकलपरिवारेण सहिताः
समाहूयन्ते संप्रति विनयपूर्वं सहविधम् ।
मिलित्वा सत्रेऽस्मिन् कथनश्रवणादेरपि सुखैः
सहर्षं स्वात्मानं सफलयत यूयं प्रतिपदम् ॥५॥

रामनाथगोविन्दप्रसादः, सन्दीपोह्यरविन्दप्रसादः ।
श्रीराहुल-सिद्धार्थप्रसादः, आदित्यनाथ-मुकुन्दप्रसादः ॥६॥

श्रीविश्वनाथो भरतस्वरूपः, सुबोधचन्द्रः खलु राघवेन्द्रः ।
श्रीयुक्तराधारमणः सुराजा, श्री श्रीहरिश्चन्द्र उदारचेताः ॥७॥

श्रीरामोरघुवीरो, ज्योतिस्वरूपो माधवप्रसादः ।
श्रीयुतमहेशचन्द्रः, सर्वेऽमी स्वागताऽध्यक्षाः ॥८॥

ललितहरेः कुलजाताः सर्वेऽमीधन्यवादार्हाः ।
वितरतु शं वनमाली, सर्वेषामेव चैतेषाम् ॥९॥

प्रार्चतेतिश्रुति-वर्यनिदिष्टा, श्रीहरेर्भवति मूर्तिप्रतिष्ठा ।
पूजनं भवति सर्ववरिष्ठं, सम्मतं सकलशास्त्रगरिष्ठम् ॥१०॥

श्रीपीतभित्तौ जगदीशमार्गे, लक्ष्मीसुशीलाचरणैः सदाढ्ये ।
विराजतामाब्दमहो महोऽयं, श्रीयुक्तराधावरमन्दिरेस्मिन् ॥११॥

श्रीविरजानन्द-स्मारकभवनोद्घाटनम्

वि० सं० २०३१ माघ शुक्ल

सा जयति श्रीमथुरा, यस्यां पूर्वं चिदानन्दनम् ।
निखिल-श्रुति-प्रतिपाद्यं, ब्रह्मैवाविः समायातम् ॥१॥
स जयति विरजानन्दो, यस्यादेशाद् दयानन्दः ।
स्वे स्वे कर्मणि सुप्तं, मानव-मात्रं स्म चेतयते ॥२॥
विरजानन्दस्मारक-, भवनस्योद्घाटनं कर्तुम् ।
बी० डी० जत्तीसंज्ञो, भारतराष्ट्रोपपतिरागात् ॥३॥
उपराष्ट्रपतेर्वयमादरतः, शुभमागमनं नमनेन समम् ।
करवाम उदारमतेरभितो, ऽप्यवलोकनतो नयनं सफलम् ॥४॥
धन्याविमौ द्वावपि माननीयौ, सत्यप्रकाशश्च प्रकाशवीरः ।
अध्यक्षतायामथ नेतृतायां, ययोरिदं कार्यमभून्नितान्तम् ॥५॥
अत्रागता ये बहवोऽपि लोकाः, सर्वे वयं धन्यतमा अभूम ।
समागतानामिह देशपानां, यतो वयं स्वागतमाचरामः ॥६॥

निर्माणकाल ज्येष्ठ कृष्णा एकादशी वि० सं० २०२९

साहित्यसंमेलन-गोष्ठिकायां, साहित्यकारः खलु सुप्रसिद्धः ।
सम्माननीयः सुकविः सुधीभि- र्विराजते सम्प्रति बालकृष्णः ॥१॥
श्रीआगराविश्वविद्यालयस्य कुलपतिः श्रीमान् ।
श्रीरावजीसुधीः सर्वैरस्माभिरभिनन्द्यते ॥२॥
श्रीबालकृष्णोद्भवभूमिकायां, श्रीबालकृष्णोऽपर एष भाति ।
ततः पुरातत्त्वविभाग एष, मणौ शुभः काञ्चनयोगतुल्यः ॥३॥
श्रीप्रभुदयालमीतल—, मभितः सर्वेऽभिनन्दामः ।
हृष्यति मथुराऽप्येनं, साहित्यवाचस्पतिं प्राप्य ॥४॥
व्रजोद्भवेनाऽप्यमुना व्रजस्य, सेवा कृता तत्त्वप्रकाशनेन ।
धन्यो व्रजोऽननेन व्रजेन चैष, तस्मादुभावप्यतिधन्यधन्यौ ॥५॥
श्रीजयकुमारमुद्गल - वरसानेलाल - चतुर्वेदी ।
स्वल्पाहारविधाया, जयतां संयोजकावेतौ ॥६॥

मानस-चतुःशताब्दी महोत्सवः

निर्माणकालः २०३०

व्रजजनपदीयमानस-चतुःशताब्दी महोत्सवे समितिः ।
वृन्दाविपिनविभागे, मानसगोष्ठीं समानयति ।।१।।
श्रीप्रभुदयालुकृपया, धीरेन्द्रमोहनस्य छायायाम् ।
श्रीयुतवृन्दाविपिने, मानसगोष्ठी समुल्लसति ।।२।।
स जयति तुलसीदासो, रामचरितमानसं येन निरमायि ।
यत्सकृदपि प्रविश्य, संसारे नहि जनो रमते ।।३।।
इन्दु-विभूषणनामा, अखण्डपाठैर्भृशं सुमानार्हः ।
यस्योद्यमवशवर्ती, मानसप्रचारः समुल्लसति ।।४।।
जयति-जनार्दनदत्तो, दत्तो नूनं जनार्दनेनैव ।
मानस-चतुःशताब्दी -, महसो योऽध्यक्षतां यातः ।।५।।
श्रीराजसूययज्ञे, जनार्दनो यथाऽग्रपूजायाम् ।
तद्वज्जनार्दनोऽयं, मुख्यो ह्यतिथिः समानमानार्हः ।।६।।

काश्मीरदेशभूपति-कर्णसिंहाभिनन्दनम्

निर्माणकाल : २०३१

काश्मीरदेशं खलु भौमस्वर्गं, वदन्ति सर्वेऽपि महानुभावाः ।
तत्राधिराजो बुधकर्णसिंहो, विराजते पर्यटकस्य मन्त्री ।।१।।
विद्वत्पूर्णः श्रीलकाश्मीरदेश-, स्तत्रत्योऽयं कर्णसिंहोऽपि राजा ।
सौशील्याद्यैः श्रीगुणैरभ्युपेतः, सम्मानार्हः सर्वलोकस्य भूमौ ।।२।।
लोकातीता श्रीहरेर्जन्मभूमिः, लोकातीतो भूपतिः कर्णसिंहः ।
लोकातीतं सद्म चैवातिथेयं, लोकातीतं तस्य सूद्घाटनं च ।।३।।
कृष्णादेवी-डालमीयाभिधाना, अन्ता राष्ट्रीयाऽतिथीनां च शाला ।
उद्घाटोऽस्या जायते मन्त्रिहस्तैः, सौख्येनाढचैर्जानुदघ्नं विशालैः ।।४।।
यो भारतस्योड्डयनस्य मन्त्रो, विख्यातिमान् पर्यटकस्य मन्त्री ।
उद्घाटनं तस्य कराम्बुजाभ्यां, सौख्यप्रदं स्यादतिथिव्रजस्य ।।५।।

जयदयालवतोऽपि हरेरिदं, भवति विष्णु शुभं शुभदं सदा ।
अतिथिगेहमुपेत्य जनः समः, सुखमुपेत्य सदा मुदितो भवेत् ।।६।।

मानसचतुः शताब्दी-, महसो योऽध्यक्षतां यातः ।
उद्घाटयति रामकिंकर-रामकथां-मानसोल्लासैः ।।७।।

श्रद्धाञ्जलिः

निर्माणकालः वि० सं० २०३३

सदा व्रजनिवासधी रसिकशेखराऽऽसक्तधीः
सदोज्ज्वलरसाक्तधीः सकल-शास्त्रपाराप्तधीः ।
जगद्रस-विरक्तधीः प्रभुरहस्य-संरक्तधीः
प्रियाशरणदासधी–र्जयति साधुसंसक्तधीः ।।१।।

गोवर्धने परिसमापित-लीलिकस्य
वृन्दावने प्रियतमार्पित-जीवकस्य ।
श्रीमत्प्रिया–शरणकस्य महोत्सवेऽस्मिन्
श्रद्धाञ्जलिं रचितवान् वनमालिदासः ।।२।।

श्रीलविशाखाशरणः, श्रीकुञ्जविहारिशरणश्च ।
श्रीलमाधुरीशरणः, सर्वेऽप्येते महात्मानः ।।३।।

अभिनन्दति रतिपूर्वं, श्रीप्रियाशरणान् महात्मनो विदुषः ।
श्रीवृन्दावनवासी, शास्त्री वनमालिदासाख्यः ।।४।।

व्रजहोलिकायाः स्वारस्यम्

निर्माणकालः वि० सं० २०१३

पूर्वं सखीभिरतिनर्मसु होलिकायां,
क्रीड़ा कृता भगवता ननु पुष्पयष्टचा ।
तं भावमर्पयितुमेव व्रजेऽधुनापि,
क्रीड़ा विधीयत इव प्रणयात्सुयष्टचा ।।१।।

यथा विदूरत एव, वृन्दावन-वास-वासनानन्दः ।
नीयत आन्तरिको वै, बाह्योऽप्यधुना समालम्ब्यः ।।२।।

पं० श्रीराधावल्लभाऽभिनन्दनम्

निर्माणकालः वि सं० २०१३

श्रीराधाविरहानलाख्यकुमुदं प्राचीकशद् यः पुरा,
वाणीचन्द्रिकयाऽनिरुद्ध - रसभागूषाविलासं ततः ।
येनाऽकारि सरोजिनी हितपराऽलीनां सतां प्रस्फुटा,
राधावल्लभचन्द्रमाः स जयतात् साहित्यसिन्दूद्भवः ॥१॥
अभिनन्दति रतिपूर्वं, श्रीराधावल्लभान् विदुषः ।
श्रीवृन्दावनवासी, शास्त्री वनमालिदासाख्यः ॥२॥

श्रीरूपगोस्वामिसुभक्तिभावकै-र्वृन्दावने स्वेन प्रकाशमीयुषे ।
वृन्दावनाज्जयपुरराजधान्यां, विराजमानाय नमो नमस्ते ॥१॥
पाटोत्सवे जयपुरेऽद्य प्रवर्तमाने, गोविन्ददेव-सदने सदनेक-पूर्णे ।
तस्यैव प्रीतिविषयं खलु लेखमेतं, वृन्दावने लिखितवान् वनमालिदासः ॥२॥

वरवध्वोराशीर्वादः

निर्माणकालः वि० सं० २०३०

ज्योतिः स्वरूपस्य तु ज्योतिरेष, श्रीकृष्णचन्द्रस्य प्रसाद एषः ।
मूर्तं हरिश्चन्द्रयशश्च राधा-, वरस्य मूर्तो वर एष जीयात् ॥१॥
ऊषां विलोक्यैव यथा जना मुदा, स्वं स्वं शुभं कर्म समारभन्ते ।
तथैव गोविन्दवरोषयाऽनया, चिरं शुभं कर्म समारभस्व ॥२॥
सीताराम - रामरघुवीरौ, टीकमचन्द्र - पद्मचन्द्रवीरौ ।
श्रीऊषागोविन्दवरस्य, कुरुतां कुशलं सपदि चिरस्य ॥३॥
प्रीतभित्तिरर्गलपुरमेत्य, छीतरमल इति फर्म समेत्य ।
सुष्ठु विभाति विभेव सुभानोः, श्रीहरि-कृपया भवतु विभा नो ॥४॥

विहारप्रान्तान्तर्गत-व्याघ्रसरस्थितचरित्रवने भगवतः श्रीवैकुण्ठ-नाथस्य दिव्यदेशप्रतिष्ठामहोत्सवावसरे श्रीवृन्दावनवास्तव्यैः, महाकवि–श्रीवनमालिदासशास्त्रिमहोदयैः

सादरं समर्पितो

वाक् पुष्पाञ्जलिः

वि० सं० २०३३ फाल्गुन शुक्ला द्वादशी

गंगातटे व्याघ्रसरे हि विश्वा—, मित्रस्य यज्ञस्थल-ताटकावधे।
विराजमानाय च भक्तहृत्सु, वैकुण्ठनाथाय नमो नमस्ते ॥१॥

विश्वामित्रोऽपि यत्रैव रामायोपदिदेश ह।
पराऽवरे हि द्वे विद्ये क्षुत्पिपासा-निर्वर्तिके ॥२॥

प्रतिवादिभयंकरश्च यो, विनतानन्दनवर्धनः सदा।
हरिभक्तिप्रचारणे रतो, भुवि सर्वत्र सुखेन मानवे ॥३॥

अनेकशास्त्रार्थविधौ रतः सदा, अनेकपत्रादिप्रकाशने रतः।
अनेकमाहात्म्यगुणैरलंकृतः, अनन्त आचार्य उदैदनन्तकः ॥४॥

वैदुष्यं यस्य श्रुत्वा निवह उ विदुषां शिष्यतां सम्प्रयातः
सौजन्यं यस्य दृष्ट्वा प्रमदभरमयाद् भूरि चेतः समेषाम्।
यस्यैवाऽनुग्रहेण प्रकटमुपययौ मुम्बईदिव्यदेशः
सोऽनन्ताचार्यवर्यो जगति विजयते पूजिताचार्यवर्यः ॥५॥

येषां सत्कृतये निजैः परिकरै-र्वाईसरायोऽलगत्
येषां नामत ए प्रकाशमयते सन्देशभाक्पत्रिका।
येषां पुत्रवरो वरार्चितगुणः श्रीकृष्णमाचार्यकः
पुत्रो यस्य विभाति भक्तिरसिकः श्रीश्रीनिवासः सुधीः ॥६॥

यस्यैवाऽध्यक्षतायां प्रचलति मधुरा दिव्यदेशप्रतिष्ठा
शान्तो दान्तस्तितिक्षुः प्रभवति सरलो यो हि विद्वान् महाँश्च।
श्रीमद्रामानुजार्यैर्विरचितकृतिषु स्वष्टसंख्या मठेषु
काञ्चीपीठे हि मुख्ये मठपतिरभवद् दिव्यतेजा अनन्तः ॥७॥

रामाग्निशून्यकर-सम्मितविक्रमाब्दे,
पक्षे हि फाल्गुनसिते द्विदशाढ्यतिथ्याम् ।
वैकुण्ठनाथभगवद्विमलाप्रतिष्ठा,
जाता हि सा भवतु सर्व-सुमङ्गलाय ॥८॥

विश्वक्-सेनाचार्यवर्यो महात्मा, शिष्योऽनन्ताचार्यवर्यस्य मुख्यः ।
योगी त्यागी निष्पृही पारदृश्वा, शास्त्रस्तोमस्यापि शान्तः स जीयात् ॥९॥

निवसति गंगातीरे, चातुर्मास्यं च यः सदा कुरुते ।
वैष्णवमतप्रचारे, विपुलो यस्यास्ति सहयोगः ॥१०॥

यस्य निदेशं प्राप्य, श्रीवासुदेवः सोमानी ।
सादरमनुपमदेशं, चरित्रवने दिव्यदेशमधात् ॥११॥

मांगीदेवी-वासुदेवस्य भक्त्या, सप्ताहोऽयं सौम्यदेशे विभाति ।
वक्ता सौम्यो नारसिंहो हि विद्वान्, चेतो हर्ता श्रोतृवर्गस्य वाण्या ॥१२॥

सोमानीवंशरत्नं स जयति विदितः श्रील ओंकारमालो
यस्यौदर्येण रूप्यैर्द्विनियुतनिमितै - र्वासुदेवाऽऽह्वयेन ।
विश्वक्सेनाऽऽज्ञयाऽयं निजधनसुफलो दिव्यदेशो ह्यकारि
सोऽयं लोकद्वयेऽपि प्रतिपदमयतां कीर्तिमानन्ददात्रीम् ॥१३॥

येनाऽकारि गुरोर्निजस्य चरितं काव्यं कविप्रीतिदं
चक्रे 'सख्य-सुधाकरं' य उ महाकाव्यं 'हरिप्रेष्ठकम्' ।
टीकां यश्च लिलेख भाववलितां गोपालचम्पूद्वये
तेनाऽयं वनमालिदासकविना दत्तो हि पुष्पाञ्जलिः ॥१४॥

श्रीमत्सभापतिमुखान् विदुषः प्रणामै-, र्देवालयाय धनदानपि धन्यवादैः ।
वृन्दाटवी-वसति-लब्ध-कवित्वशक्तिः, प्रेम्णाऽभिनन्दति भृशं वनमालिदासः ॥

श्रीधन्वन्तरिस्तोत्रम्

निर्माणकाल वि० सं० २०३४

यो भक्तवत्सलतया जगदुद्दिधीर्षु र्व्याधेर्विमोच्य सकलं विमलं चिकीर्षुः ।
ताताच्च दीर्घतमसोऽवततार लोके, धन्वन्तरिः स भगवान् मम शंतनोतु ॥१॥

नाम्ना नृणां पुरुरुजां रुज आशु हन्ति,
साम्ना विशोधयति सर्वंजगन्मनांसि ।
धाम्ना विराजयति सर्व-विलोचनानि,
धन्वन्तरिः स भगवान् मम शं तनोतु ॥२॥

यः कीर्तिरूप इति भागवते निरुक्तो, वेदस्य चाऽऽयुष इहैव प्रवर्तकश्च ।
सर्वेश्वरः सकलरोग-निवर्तकश्च, धन्वन्तरिः स भगवान् मम शं तनोतु ॥३॥

अश्वत्थ - पिप्पल - लवङ्ग - गुडूचिकानां,
सुण्ठयष्टवर्ग - गुड - कृष्णमरीचिकानाम् ।
लोकोत्तरान् गुणगणानिह वेत्ति सम्यग्,
धन्वन्तरिः स भगवान् मम शं तनोतु ॥४॥

विल्वा कपित्थ - रजतादि - सुवर्णकानां,
जावित्र - जायफलका - त्रिफलाऽऽह्वयानाम् ।
लोकोत्तरान् गुणगणानिह वेत्ति सम्यग्,
धन्वन्तरिः सभगवान् मम शं तनोतु ॥५॥

देवाऽसुरेषु बहुशः कलहायमानेष्वादाय सौधकलशं जलधेः संसार ।
पात्रेषु भक्तवरकेषु वितीर्णवान् यो, धन्वन्तरिः स भगवान् मम शं तनोतु । ६॥

माधुर्यसिन्धुरपि यः किल धैर्यसिन्धुः,
सौन्दर्यसिन्धुरपि यः खलु शीलसिन्धुः ।
आर्तेषु जीवनिवहेषु दयादि-सिन्धु–
र्धन्वन्तरिः स भगवान् मम शं तनोतु ॥७॥

नैतादृशी सुकरुणा क्वचिदेव दृष्टा, नैतादृशं सुहृदयं क्वचिदेव दृष्टम् ।
एवं विचार्य मयका भृशमर्थ्यतेऽसौ, धन्वन्तरिः स भगवान् मम शं तनोतु ॥८॥

वेदाग्नि-शून्य-कर-सम्मित-विक्रमाब्दे, वृन्दावने शुभद आश्विनकृष्णपक्षे ।
रामात्तचित्त-भगवज्जन-प्रेरणातः स्तोत्रं त्विदं रचितवान् वनमालिदासः ॥९॥

व्याख्यान-दानविधया भुवि सज्जनानां, शंकाकलंकमिहभूरि विमोचयन्तम् ।
साधुस्वभाव-शुभशीलयुतं दयालुं श्रीस्वामिरामसुखदासमहंनतोऽस्मि ॥१०॥

समर्पणकालः वि० सं० २०३४

करुणापतित्रिपाठी, कमलापतिरिव हितो नृणाम्।
तस्येदं करकमले, काव्यं कर्त्रैव विन्यस्तम्॥
स जयति मण्डनमिश्रो, मण्डनमिश्र इव सर्वशास्त्रज्ञः।
तस्येदं करकमले, काव्यं कर्त्रैव विन्यस्तम्॥
सीतारामाख्य-विदुषः करपङ्कजयोरिदम्।
समर्पितं हरिप्रेष्ठ-काव्यं कर्त्रैव सादरम्॥
श्रीशारदाप्रसादस्याऽऽशुकवेः करकंजयोः।
समर्पितं हरिप्रेष्ठ-काव्यं कर्त्रैव सादरम्॥
श्रीवासुदेव-करपंकजयुग्ममध्ये, काव्यं समर्पितमिदं हरिप्रेष्ठ-संज्ञम्।
दृष्टवैव सादरमिदं च निजाशिषा मां पूर्णायुषं स कुरुतां वनमालिदासम्॥

उपगीतिछन्दः—

यद्यप्याशुकवित्वं, निर्मातुं नास्मि शक्तोऽहम्॥
तदपि हरिप्रेरणया, निःसरति यथा सुवच्मि तथा॥
अतुलकृष्ण-कराम्बुजयोरियं, सविवृतिः सुकृतिः सुसमर्प्यते।
समवलोक्य समन्तत आदराद्, वितरतात् स हि टीकयितुः शुभम्॥

निर्माणकालः वि० सं० २०३४

यदा मम लोचनयोर्मुक्ताविन्दुरासीत्
तदा मन्मुखात् प्रार्थनामयीयमुक्तिराविरासीत्

द्रुतबिलम्बितंछन्दः—

मम तु लोचनयोरुभयोर्गता, सकल-शक्तिरहं करवाणि किम्।
मदनमोहन! देहि दृशोर्बलं, तत इदं त्वयि भो विनिवेद्यते॥१॥

चिकित्साऽनन्तरं सूक्तिरियं प्रादुरभूत्–

शालिनीछन्दः—

आशाऽतीतं कार्यजातं हि जातं, जातं सर्वं कृष्णचन्द्रप्रभावात्।
तस्मान्नित्यं तं सखायं भजेऽहं, वृन्दारण्ये स्वैः समस्तैः समेतम्॥२॥

मथुरायां संस्कृत-साहित्य-संमेलने कृतम्
श्रीमथुरापुरी-वैशिष्टचवर्णनम्
निर्माणकालः वि० सं० २०३४

यद्वासिनामुदयते हृदये तु भक्तिर्मुक्तिं तु दर्शनत एव मुदा ददाना।
काशीशमुख्य-सुर-वन्दित-पादपद्मा, वैकुण्ठनाथ-परिकीर्तित-कीर्तिमाला ॥१॥

या निर्मथ्य च राति ब्रह्म विमलं श्रीकृष्णरूपं पुरा
यां चात्यर्थमलं चकार भगवान् कृष्णः स्वयं जन्मना।
या सर्वासु पुरीषु पट्टमहिषीवास्ते बुधैः सम्मता
सा श्रीमद्मथुरापुरी वदत भोः केषां न वन्द्या भवेत् ॥२॥

'आराध्य राधां भजे' इति समस्या-पूर्ति :—

कृष्णाराधनमेव न श्रुतिमतं हित्वा यदाराधनं
या चाऽऽराधयति व्रजेशतनयं तेनापि याऽऽराध्यते।
यस्याः कीर्तिरलं करोति विमला शास्त्रान्तरालं सदा
तां श्रीमद्वृषभानुभूपतनयामाराध्य राधां भजे ॥१॥

'प्रकाशतामेष जयप्रकाशः' इति समस्या–पूर्तिः—

नारायणस्येव हि यस्य रीतिः, सर्वेषु भूतेषु चराचरेषु।
सत्प्रेरणादायक-सज्जनोऽसौ, प्रकाशतामेष जयप्रकाशः ॥१॥
यदा जने भारतता प्रयाता, स्फूर्तिप्रदाता जनता-विधाता।
त्यागी विरागी जनताऽनुरागी, प्रकाशतामेष जयप्रकाशः ॥२॥
यः कूटनीतेर्विकृतिं जहास, मूर्त्तो व नारायणजो नु हासः।
स्वतन्त्रताया विपुलो विलासः, प्रकाशतामेष जयप्रकाशः ॥३॥
मुरारिदेशाद् मुखान् प्रधानान्, संयोज्य पारस्परिकं विरोधम्।
यो हापयित्वा सफलीचकार, प्रकाशतामेष जयप्रकाशः ॥४॥
विपत्तिकालेऽपि हि यस्तु धीरः सम्पत्तिकालेऽपि महान् गभीरः।
लोकोत्तरो यः सरसः समीरः, प्रकाशतामेषजयप्रकाशः ॥५॥

भक्तिवेदान्त–शोकस्मृतिः

निर्माणकाल : वि० सं० २०३४

श्रीभक्तिवेदान्त-महोदयानां, शोके सभायां हि समागता ये ।
या मातरश्चैव तथा भगिन्यः, सुस्वागतं सर्वजनस्य कुर्वे ॥१॥

श्रीभक्तिवेदान्त-महानुभावाः, सम्प्राप्त-वृन्दावन-रेणुभावाः ।
अशेषित-प्राकृतदेहभावा, जयन्ति सम्प्राप्त-विशुद्धभावाः ॥२॥

अमरीकादिदेशेषु, येन भक्तिः प्रचारिता ।
तस्य शोकाकुलाः सर्वे, भक्तिवेदान्त-स्वामिनः ॥३॥

श्रीमद्भागवतं सर्वं, भाषायामाङ्गलस्य च ।
अनूदितं च येनैव, तस्य कीर्तिर्गता दिशः ॥४॥

गीतया सह येनैव, चैतन्यचरितामृतम् ।
उक्तमाङ्गलभाषायां, तस्य शोको दुनोति नः ॥५॥

वृन्दावने कृतं येन, मन्दिरं रामकृष्णयोः ।
तस्य शोकाकुलाः सर्वे, शिष्याः सीदन्ति साम्प्रतम् ॥६॥

अधुनोज्झित-देहोऽपि, यशोदेहं समाश्रितः ।
राजते सर्वदेशेषु, व्याख्यां कुर्वन्निवाऽऽदरात् ॥७॥

आदि – मध्यावसानेषु, कृत-वृन्दावनस्थितिः ।
वृन्दावनीयान्नः सर्वान्, प्रभुपादो धिनोति सः ॥८॥

येन प्राकाश्यमानायि, विश्वविद्यालयोऽद्भुतः ।
भक्तिवेदान्तस्वामी सः, प्रभुर्विजयतेतराम् ॥९॥

महामन्त्रं च सर्वत्र, हरेकृष्णेति वर्णकम् ।
कीर्तिं च स्थापयामास, श्रीचैतन्यमहाप्रभोः ॥१०॥

श्रीभक्तिसिद्धान्तसरस्वतीनां, श्रीभक्तिवेदान्तवरो हि शिष्यः ।
सर्वत्र देशेषु चरन् समन्तात्, प्रकाशते सूर्य इवाम्बरस्थः ॥११॥

चकार चैतानपि शोकश्लोकान्, सभासदस्तैश्च विनीतशोकान् ।
श्रीभक्तिवेदान्तविशोकचेता, महाकविः श्रीवनमालिदासः ॥१२॥

श्रीवृन्दावनस्थ–सुदामाकुटीतः प्रकाशिते श्रीभक्तमालग्रन्थे

शुभ–सम्मतिः

निर्माणकालः वि सं० २०३३

येनाऽकारि गुरोर्निजस्य चरितं काव्यं कविप्रीतिदं
चक्रे 'सख्य-सुधाकरं' य उ महाकाव्यं 'हरिप्रेष्ठकम्' ।
टीकां यश्च लिलेख भाववलितां गोपालचम्पूद्वये
तेनेयं वनमालिदासकविना देदीयते सम्मतिः ॥१॥

गणेशदासेन सुटीकितेऽस्मिन्, श्रीयुक्तरामेश्वरदासभाष्ये ।
श्रीभक्तमालाऽऽह्वय-दिव्यग्रन्थे, मनोऽलिसंघो रमते समेषाम् ॥२॥

कतिपय-टीकाग्रन्था, दृष्टा श्रीभक्तमालायाः ।
ते नो सर्वाङ्गीणा, यथाऽयमास्ते सर्वाङ्गीणः ॥३॥

मधुनि लिल्युरशेषरसाः प्रथा, तदवदत्र हि भक्तिरसाः समे ।
इति विचार्य विचारचणा जना, अपि पठन्तु मनोहर-पुस्तकम् ॥४॥

पूर्वं पूर्वमितस्तु, प्राकाशित-भक्तमालग्रन्थानाम् ।
नैव प्रकाशनरीती, रमणीयाऽऽसीद् यथैतस्य ॥५॥

स जयति गणेशदासः साधुः सौशील्य-सम्पूर्णः ।
यत्कृत-टीकामध्ये, गूढो भावः सर्वोऽपि मूलस्य ॥६॥

श्रीरामेश्वरदासः, स जयति व्याख्या-प्रवीणता-पूर्णः ।
यत्कृत-व्याख्यां श्रुत्वा, चेतो नृत्यति समस्त-श्रोतृणाम् ॥७॥

श्रीभक्तमाल-पठन-श्रवणानुमोदैः, शीघ्रं समेति हृदये भजतां मुरारिः ।
बृन्दाटवी-वसति-लब्धकवित्वशक्ति-, रित्याह भक्तकृपया वनमालिदासः ।८।

श्रीसूर-प्रशस्तिकणिका

सूरपञ्चशती :—वि० सं० २०३५

श्रीसूरदासः कविचक्रवर्ती, सहित्य-संगीत-कलान्तवर्ती ।
श्रीकृष्णचन्द्रस्य चरित्रवर्ती, सदैव भूयाद् मम चित्तवर्ती ॥१॥
सीही-ग्रामे हारियाणा-प्रदेशे, जन्मस्थानं यस्य भूमौ प्रसिद्धम् ।
वैशाखस्य पञ्चमी शुक्लपक्षः, प्रादुर्भावेनैव यस्याऽऽप शोभाम् ॥२॥

बाणाऽग्नि-बाण-शशि-सम्मितविक्रमाब्दे,
प्रादुर्बभुव भुवि सोऽपि हि सूरदासः।
गोवर्धनस्य निकटे खलु पारसौली-,
ग्रामे चकार भजनं बहुशो महात्मा ॥३॥

यस्य गुरुत्वं प्राप्तः, श्रीयुतश्रीवल्लभाचार्यः।
सोऽयं कविषु विशिष्टः, सखिषु स्वाचार्य-शिष्येषु ॥४॥

बाणाऽग्नि-शून्य-कर-सम्मितविक्रमाब्दे, सेयं मुदा भवति पंचशतो हि यस्य
राष्ट्रीय-संसदि महोत्सवभावपूर्वं, तं सूरदासकविवर्यमहं नमामि ॥५।

सूर-कवित्वं श्रुत्वा, कः कविर्यो न शिरश्चालयति।
सर्व-रसालंकारं, कारं कारं मनः सरसम् ॥६॥

किं शूरस्य शरो लग्नो, पद्यं सूरस्य किं श्रुतम्।
इति पृच्छति द्रष्टाऽपि, धुनानमुभयं शिरः ॥७॥

श्रीकृष्णचन्द्रस्य चरित्रजातं, दृष्ट्वैव सर्वं हृदि दिव्यदृष्ट्या।
प्रकाशयामास निबध्य पद्यै-, स्तदेव सद्भक्तहिताय लोके।८॥

सूर-प्रशस्तिकणिका-कणिकापि पीता
दूरीकरोति भवरोगभयं जनानाम्।
इत्याकलय्य भुवि सर्वजनैः समन्तात्
पेया प्रशस्ति-कणिका श्रवणद्वयेन ॥९॥

येनाऽकारि गुरोर्निजस्य चरितं काव्यं कविप्रीतिदं
चक्रे 'सख्य-सुधाकरं' य उ महाकाव्यं 'हरिप्रेष्ठकम्'।
टीकां यश्च लिलेख भाववलितां गोपालचम्पूद्वये
तेनेयं वनमलिदासकविना सूर-प्रशस्तिः कृता ॥१०॥

शुभ-सम्मतिः

वि० सं० २०३५ श्रावणी अमावस्या

श्रीवासुदेव-बुधवर्य-विनिर्मितोऽयं, नन्दोत्सवो विदिततत्त्वदृशा व्यलोकि।
सिद्धान्तवर्णनपरं यदिहास्ति वस्तु, गौडीयवैष्णवचितं तदु सर्वमेव ॥१॥

श्रीवासुदेवकृष्ण:, कृतवान् नन्दोत्सवं यमिह ।
तत्राऽष्टादशश्लोका, विवृतिं याता: सुभाष्यपूर्वं हि ।।२।।
अतस्तु विज्ञैरपि विज्ञतेप्सुभि-, र्विलोकनीया कृतिरेषकाऽऽदरात् ।
विलोकनादेव हि विज्ञता-लता, आनन्दरूपं सुफलं फलिष्यति ।।३।।

श्रीमद्भागवतीये, श्रीमन्नन्दोत्सवे विज्ञै: ।
लिखिता भावा ये ये, ते ते सर्वेऽत्र विद्यन्ते ।।४।।
श्रीवासुदेवेन विनिर्मितेऽस्मिन, नन्दोत्सवेऽपूर्व-रहस्य-पूर्णे ।
स्वसम्मतिं साधु ददाति पाठे, महाकवि: श्रीवनमालिदास: ।।५।।

श्रीस्वामिरामसुखदास-लिखित-गीता-परिमाणलेखोपरि

शुभसम्मति: वि० सं० २०३५

गीताया:श्लोकानां, परिमाणं निश्चितं कृतवान् ।
शास्त्र-विचारणपूर्वं, श्रीस्वामी रामसुखदास: ।।१।।
शास्त्रक्षीराब्धिमुन्मथ्य, निजधीमन्दरेण भो: ।
श्रीरामसुखदासेन, गीतापरिमिति: कृता ।।२।।
शास्त्रसिन्धावशक्तानामूहाऽपोहविमर्शने ।
बालानां सुखबोधाय गीतापरिमिति: कृता ।।३।।
श्रीस्वामिरामसुखदास-सुविज्ञवर्यै-
र्गीताश्रुते: परिमितेस्तु व्यलेखि लेख: ।
तत्सत्यतोपरि निजानुमतिं ददाति
श्रैष्ठयं विचार्य सुकविर्वनमालिदास: ।।४।।

भूतपूर्व शिक्षामन्त्री भारत सरकार डॉ० त्रिगुणसेन जी

त्रिगुणसृष्टिरियं त्रिगुणैर्मता, त्रिविबुधै रचना-हृति-रक्षणा ।
त्रिगुणसेनकृतं निखिलं जगत्, त्रिगुणसेनवराय नमोऽस्तुते ।।१।।

शुभसम्मति: वि० सं० २०३३ वैशाखकृष्णा अमावस्या

श्रीलक्ष्मीधरशास्त्रिणा विरचिता नाम्नां तु या कौमुदी
तट्टीकामपि चन्द्रिकां समकरोत् कानाइलालो बुध: ।

वङ्गीयाक्षरमुद्रितापि सरला सन्मात्र-सत्सौख्यदा
तस्माच्छ्रीवनमालिदासकविना तेने स्वयं सम्मतिः ।।१।।
कानाइलालटीकाढ्या भगवन्नाम-कौमुदी ।
अवश्यमेव द्रष्टव्या विबुधैरबुधैरपि ।।२।।

शब्दब्रह्म-शतके सम्मतिः वि० सं० २०३५

श्रीलहरिशरणशास्त्री, चक्रे श्रीशब्दब्रह्म-शतकं यत् ।
श्रीशब्दब्रह्मतत्त्व-, जिज्ञासुभिस्तदवश्य-पठनीयम् ।।१।।
नेपालदेशोद्भवकेन येन, हरेश्च नित्यं शरणागतेन ।
व्यलेखि शब्दे शतकं विचित्रं, तत् सर्वविज्ञैरपि मान्नीयम् ।।२।।

श्रीनिम्बार्कजयन्तीमहोत्सवे समागतानां

सर्वेषामभिनन्दनम्

निर्माणकालः वि० सं० २०३५ कार्तिक शुक्ला पूर्णिमा

राधासर्वेश्वरशरणदेवाह्वयाऽऽचार्यवर्यः
श्रीजीत्याख्यामेपि च खलु यः सान्वयां संविभर्ति ।
निम्बादित्यं निजसुचरितैर्नित्यसन्तं करोति
सोऽयं सर्वान् सुखयतितरां राजमानः सभायाम् ।।१।।
स जयति बदरीनाथो, बदरीनाथ इव सर्वसंपूज्यः ।
कुलपतिरतिशय-विदतः, सम्प्रत्यस्माकमध्यक्षः ।।२।।
मुख्योऽतिथिर्जयति सम्प्रति सर्वमान्यः
श्रीस्वामिनाथन इति प्रथितः पृथिव्याम् ।
प्राचार्य एव नहि केवलमेष पीठे
विज्ञेषु विज्ञतमता अपि यस्य वित्ताः ।।३।।
श्रीलश्रीस्वामिनाथः स जयति विदितो विज्ञसम्मानकर्ता
सौजन्यं यस्या दृष्ट्वा प्रमदमुपययौ भूरि चेतो मदीयम् ।
यस्यैवाऽनुग्रहेण प्रकटितविभवेनाऽस्मि दत्ताऽवलम्बः
श्रीमद्गोपालचम्प्वाः प्रकटनविधये साहसेन प्रवृत्तः ।।४।।

श्रीब्रजवल्लभशरण:, श्रीयुतगोविन्दशरणश्च ।
अपूर्व-महोत्सवकरणे, द्वावप्येतौ सुनिपुणौ स्तः ।।५।।

श्रीवासुदेवकृष्ण:, कृष्ण इव नीतौ सुनिष्णातः ।
सर्वसमन्वयकरणे, अयमपि संयोजकः कुशलः ।।६।।

आचार्यनिम्बार्कजयन्तिकायां, समागता ये तु महानुभावा: ।
या मातरश्चैव तथा भगिन्य:, सुस्वागतं सर्वजनस्य कुर्वे ।।७।।

वाराणसीतस्तु समागता ये, समागता ये च तथेन्द्रप्रस्थात् ।
समागता ये मथुरापुरीतो, बृन्दावनाद् ये च महानुभावा: ।।८।।

येवाऽन्यतश्चैव समागताः स्यु:, सुस्वागतं सर्वजनस्य कुर्वे ।
या मातरश्चैव तथा भगिन्य–, स्तासामपि स्वागतमेव कुर्वे ।।९।।

येषामहं वेद्मि न नामधेयं, न रूपधेयं न च भागधेयम् ।
समागता ये पुरुषप्रधाना:, सर्वानिहं तानपि पूजयामि ।।१०।।

येनाऽकारि गुरोर्निजस्य चरितं काव्यं कविप्रीतिदं
चक्रे 'सख्य-सुधाकरं' य उ महाकाव्यं 'हरिप्रेष्ठकम्' ।
टीकां यश्च लिलेख भाववलितां गोपालचम्पूद्वये
तेनेदं वनमालिदासकविना देदीयते भाषणम् ।।११।।

निम्बे ह्यर्को दर्शितोऽस्तंगतेर्के, स्वाचार्यत्वं कुर्वता येन व्यक्तम् ।
भक्तेभ्योऽच्छा कामधेनुश्च दत्ता, तं निम्बार्काचार्यवर्यं नतोऽस्मि ।।१२।।

नानादेशभुवां नृणां भुवि यथा दिल्ल्यां हि सम्मेलनं
श्रीमद्भागवते समस्तनिगमार्थानां हि सम्मेलनम् ।
सर्वेषां पयसां समुद्रसलिले यद्वद्धि सम्मेलनं
तद्वत् सत्प्रतिभाजुषां हि विदुषामद्यास्ति सम्मेलनम् ।।१३।।

इत्येषा वाङ्मयीपूजा सर्वेषां हि कृता मया ।
एतया मयि तुष्यन्तु सर्वे येऽत्र सभासदः ।।१४।।

श्रीवृन्दावनीये धर्मसंघ-प्रशिक्षण-शिविरे समवेतानां
महानुभावानामभिनन्दनम्
निर्माणकाल : वि० सं० २०३५

अयि ! श्रीभागवत-परमहंस-परिव्राजकाचार्यवर्य ! वर्यसमस्त-शास्त्र-पारावारपारदृश्व ! यम-नियमाद्यष्टाङ्गयोगानुष्ठाननिष्ठ ! निष्ठजन इव श्रीहरिहरानन्दमयपादारविन्दद्वन्द्व-मकरन्द-मिलिन्द – वर ! वरचरित ! चरितानुरञ्जित-साधुलोक ! लोकख्यात ! ख्यातयशःशीतकर ! करभाजन इव करभाजन ! भाजनजन-सभाजित ! जितनास्तिकलोक ! लोक-लोकान्तरख्यात-सनातनधर्मरक्षणैकदीक्षागुरो ! स्वामिन् ! विनति-ततिपुरः-सरं सप्रश्रयं विज्ञप्तिरियं यत् श्रीमत्प्रेरणयैव प्रवर्तिते वृन्दावनीये धर्मसंघ-प्रशिक्षणशिविरे समवेतानां समेषामेषां महानुभावानां स्वागतं करवै, अभि-नन्दनं चातनवै ।

तत्र प्रथमं धर्मसंघस्थापकाभिनन्दनम्—

सनातनं धर्ममिहोपशिक्षयन्, वैराग्यसिन्धुं परितः प्रवर्धयन् ।
भक्तेर्महत्वं स्वयमेव दर्शयन्, विराजते श्रीकरभाजनो मुनिः ॥१॥
आनन्दकन्दं परितःप्रवर्तयन्, समन्ततो नास्तिकलोकमर्दयन् ।
जनान् निजे कर्मणि संप्रवर्तयन्, विराजते श्रीकरभाजनो मुनिः ॥२॥
निजसनातनधर्म-रिरक्षिषा-, वशत एव हरिः स्वयमागतः ।
इति विचारपरैर्व्रजवासिभिः, सविनयं यतिराडभिनन्द्यते ॥३॥

धर्मसंघाऽध्यक्षाऽभिनन्दनम्

श्रीचन्द्रशेखरतया प्रथमं प्रसिद्धः, पश्चान्निरञ्जनतया भुवि यस्तु वित्तः ।
ऐक्यं विभाति हि हरस्य हरेश्च यत्र, तं शंकरं ननु निरञ्जनदेवमीडे ॥४॥
धर्मं श्रुतेः समवितुं ननु बद्धतीर्था-, स्तस्यैव रक्षणनिमित्तमधीततीर्थाः ।
तस्य प्रचारणकृते कृतसर्वतीर्था, स्तस्माज्जयन्ति हि निरञ्जनदेवतीर्थाः ॥५॥

उपाध्यक्षाऽभिनन्दनम्—

माधवो हि यथा सर्वधर्मसंघस्य चाश्रमः ।
तथा विराजतेऽस्माकं स्वामिश्रीमाधवाश्रमः ॥६॥

प्रचारमन्त्रिणोऽभिवन्दनम्

सरस्वती यथा सर्वानानन्दयति सर्वदा ।
तथा प्रचारमन्त्री श्रीसदानन्दसरस्वती ॥७॥

सन्मार्गपत्र-सम्पादकाऽभिनन्दनम्—

श्रीनन्दनन्दन य, आनन्दयति तेन यस्य वाऽऽनन्दः ।
स जयति सन्मार्गस्थः, श्रीस्वामी नन्दनन्दनानन्दः ॥८॥
सनातनं रक्षति यः सनातनं, नरोत्तमानामपि यस्तु चाश्रमः ।
जयत्यजस्रं स हि धर्मरक्षणात्, संमाननीयो हि नरोत्तमाश्रमः ॥९॥
परमविरक्तो रक्तः, श्रीसनातनधर्मरक्षायाम् ।
स जयति धर्माधारः, श्रीस्वामी श्रीशिवानन्दः ॥१०॥
वाराणसीतस्तु समागता ये, समागता ये च तथेन्द्रप्रस्थात् ।
समागता ये मथुरापुरीतो, वृन्दावनाद् ये च महानुभावाः ॥११॥
येवाऽन्यतश्चैव समागताः स्युः, सुस्वागतं सर्वजनस्य कुर्वे ।
या मातरश्चैव तथा भगिन्य,-स्तासामपि स्वागतमेव कुर्वे ॥१२॥
येषामहं वेद्मि न नामधेयं, न रूपधेयं न च भागधेयम् ।
समागता ये पुरुषप्रधानाः, सर्वानहं तानपि पूजयामि ॥१३॥
अभिनन्दति रतिपूर्वं, सर्वानत्राऽऽगतान् विदुषः ।
श्रीवृन्दावनवासी, शास्त्री वनमालिदासाख्यः ॥१४॥

निर्माणकाल : वि० सं० २०३५

श्रीहरिगुरुवैष्णव-पदारविन्द-द्वन्द्वमकरन्द-पानोन्मत्त-मिलिन्दवरायाः, शुद्धाद्वैतवेदान्त-सिद्धान्त-पटुतरायाः-श्रीमद्भागवत-भाषणचतुरायाः, देशाटन-निरताया अतएव जीवोद्धार-परायाः, विद्वत्कविजनसंमाननपरायाः, व्रजयात्राच्छलेन प्रथमवारमेव व्रजमहिम-दर्शन-संलग्नायाः, सकल-शास्त्रपारावाराऽवारपारीण-गोस्वामिवर्य-श्रीमधुसूदनलालजी-महाराजसुतायाः, श्रीवेटीतिविख्यातायाः, श्रीइन्दिराया

अभिनन्दनम्

निर्माणकालः वि० सं० २०३५

यस्य श्रीशुभदर्शनेन नितरां पूतं मनो जायते
यः शीघ्रं शरणागतान् निजजनान् तीव्रादभयात् त्रायते ।

तं जीवं स्वमिवातनोति नुतितो यः कोऽपि शब्दायते ।
वन्दे तं परमेश्वरं सुरगुरुं श्रीद्वारकाधीश्वरम् ।।१।।

समागता ये मथुरा-पुरीतो, बृन्दावनाद् ये च महानुभावाः ।
येवाऽन्यतश्चैव समागताःस्युः, सुस्वागतं सर्वजनस्य कुर्वे ।।२।।

या मातरश्चैव तथा भगिन्य–, स्तासामपि स्वागतमेव कुर्वे ।
येषामहं वेद्मि न नामधेयं, न रूपधेयं न च भागधेयम् ।
समागता ये पुरुष-प्रधानाः, सर्वानहं तानपि पूजयामि ।।३।।

पूर्वं ह्येका विदुषी, दृष्टा मयका प्रभावती राजे ।
द्वितीयेयमद्वितीया, विद्वन्मान्या हि 'इन्दिरा बेटी' ।।४।।

व्रजभ्रमणवाञ्छया किमु विहाय लोकं परं
ब्रजेन्द्रमिलनाशया भ्रमति वा व्रजं सर्वतः ।
न भावगुरुमन्तरा मिलति वा व्रजेन्द्रात्मज
इति प्रथयितुं जने चलति चालयन्तीन्दिरा ।।५।।

नानादिग्विदिगागतान् बहुजनान् स्वीये प्रबन्धे स्थितान् ।
सौख्ये स्थापयितुं स्वयं निजसुखं हित्वापि शारीरिकम् ।
कष्टं सोढुमियं परिक्रमणजं यद्यप्यनर्हा सती
माधुर्यात् तदपि स्वयं प्रथयते यौधिष्ठिरीं प्रक्रियाम् ।।६।।

श्रीमधुसूदन–पुत्री, शुद्धाऽद्वैताभिधान–सत्कर्त्री ।
व्याख्यानेन शुकोक्ते–, र्भक्तावज्ञान–संहर्त्री ।।७।।

श्रीवल्लभाचार्यमतप्रवीणा, निजस्वरेणार्चित-भव्यवीणा ।
देशाटनेनार्जित-कीर्तिरत्ना, वित्पूजने चापि कृतप्रयत्ना ।।८।।

श्रीमद्भागवतीय - भाषणविधौ पुष्टि - स्थिति - स्थापिका
शुद्धाद्वैतमत - प्रचारणविधौ विज्ञत्व - विज्ञापिका ।।
या श्रीकृष्ण - पदारविन्दयुगल - ध्यानाऽध्वनोऽध्यापिका
सेयं मूर्तिमतीन्दिरा विजयते गोवर्धन - प्रापिका ।।९।।

अभिनन्दति रतिपूर्वं, विद्वन्मान्यां हि इन्दिराबेटीम् ।
श्रीवृन्दावनवासी, शास्त्री वनमालिदासाख्यः ।।१०।।

वर-वध्वोराशीर्वादात्मकः शुभसन्देशः

निर्माणकाल : वि० सं० २०३५

श्रीकाञ्चीपुर-नामनि, नगरे शुभसभ्यतायुक्ते ।
श्रीस्वामिनाथपुत्र्याः, शुभो विवाहोत्सवो लसति ।।१।।

शोभना - रविशेखरयोः पाणिग्रहणसंस्कृतिः ।
श्रीकृष्णचन्द्रकृपया सदा भवतु शोभना ।।२।।

शर - दहन - ख - हस्तैर्निर्मिते विक्रमाब्दे
भवति परिणयो यः शोभनः शोभनायाः ।
भवतु स वर-वध्वोः सौख्यदः सर्वदैव
शुभमपि वनमाली कृष्णचन्द्रः करोतु ।।३।।

शोभना-रविशेखर, उभयोर्युगलं सुसभ्यतायुक्तम् ।
निर्वाहयतु सहार्दं, जीवनं यौगपद्येन ।।४।।

भगवान् श्रीकृष्णचन्द्रो वर- वध्वोरेतद्-युगलं दीर्घायुः कृत्वा निज-श्रीमुखोक्तगीतोपदिष्ट–वर्णाश्रम–धर्मपालनं कारयन् तद्हृदयकमले एतादृशं दृढानुरागमुत्पादयतु येन युगलमेतद् भगवच्चरणारविन्दस्याऽऽश्रयं कदापि न त्यजतु ।

गृहस्थाश्रमो रथतुल्यः । वर-वधूयुगलं तस्य चक्रद्वयपुल्यम् । गृहस्था-श्रमस्य व्यवस्था उभयोः सद्भावेनैव लोकद्वयोपकारिणी भवति ।

भगवान् श्रीकृष्णो युवाभ्यां सद्बुद्धिं ददातु । सन्मार्गं दर्शयतु । युवयोः कल्याणं च करोतु । तथा युवयोर्मतिः श्रीभगवच्चरणारविन्दयोर्दृढा भवतु ।

श्रीस्वामिनाथपुत्री, श्रीशिवरामार्यपुत्रश्च ।
यावज्जीवमजस्रं, सनातनधर्माऽनुरागिणौ स्याताम् ।।५।।

श्रीशोभनाया रविशेखरेण, विवाहकाले शुभपत्रमेतत् ।
वृन्दावनात् प्रेषयति स्म प्रेम्णा, महाकविः श्रीवनमालिदासः ।।६।।

श्रीवृन्दावन-शोधसंस्थानस्य नवमवार्षिकोत्सवे पठिता कविता

निर्माणकाल : वि० सं० २०३४ विहार पंचमी

लेखक—आशुकविः श्रीवनमालिदासशास्त्री, वृन्दावन

श्रीशोधसंस्थानमहोत्सवेऽस्मिन्, समागता ये तु महानुभावाः।
या मातरश्चैव तथा भगिन्यः, सुस्वागतं सर्वजनस्य कुर्वे ।।१।।

श्रीपादश्रीमहाराजाऽध्यक्षतायां महोत्सवः।
शोधसंस्थानवर्यस्य नवमोऽद्य प्रवर्तते ।।२।।

कन्हैयालालगुप्तोऽयमुपाध्यक्षो विराजते।
यस्य प्रेरणया सर्वं कार्यं चलति साम्प्रतम् ।।३।।

मन्त्रिणी पालिवालेयं नाम्ना प्रेमलता मता।
विराजतेतरां सम्यक् सिञ्चन्ती प्रेमधारया ।।४।।

विराजतेऽतिथिः सौम्यः प्रभुदयालमीतलः
शोधसंस्थावर्यस्य नवमेऽस्मिन् महोत्सवे ।।५।।

श्रीरामदासगुप्तेन कृतः परिश्रमो महान्।
यत्फलं शोधसंस्थानं वृन्दाभुवि विराजते ।।६।।

विश्वम्भरप्रेरणया विकाशः, विश्वम्भरप्रेरणया प्रकाशः।
विश्वम्भरप्रेरणयैव सर्वं, विश्वम्भरः प्रीतिमुपैतु सोऽयम् ।।७।।

श्रीचैतन्य-यशोलता-विमलता-विस्तारकं तारकं
षड्गोस्वामिगणादिविज्ञमहतां सूक्तिप्रथाधारकम्।
सर्वेषां प्रतिभाजुषां हि विदुषां यत् कीर्तिविस्तारकं
श्रीवृन्दावनवासि तद् विजयतां संशोध-संस्थानकम् ।।८।।

श्रीवृन्दावनीय-शोधसंस्थानस्य दशमे वार्षिकोत्सवे समुपेतानां महानुभावानामभिनन्दनम्—

निर्माणकालः वि॰ सं॰ २०३५

जयति श्रीमंजुलिका, निदेशिका या सांस्कृतिक-कार्याणाम् ।
अधुनाप्यस्मान् सर्वान्, धिनोति मंजुलिकया वाचा ।।१।।
मुख्योऽतिथिर्जयति मे बहुमाननीयः, श्रीपादपद्मरसिको विदितो महात्मा ।
आजन्म भक्तिपथसाधक-रम्यकर्मा, कर्माणि यस्य सकलानि हरिप्रियाणि ।।२।।
कन्हैयालालगुप्तोऽयं, गुप्तं कार्यं करोति नः ।
समर्थः कार्यकारी च, पदाध्यक्षो विराजते ।।३।।
सम्प्रति प्रेमलताऽपि, प्राचार्या पालिवाला च ।
प्रेमलतेव जनानां, हरिभक्तौ-मन्त्रिणी जयति ।।४।।
श्रीरामदासो जयतीह शोध-, संस्थान-संस्थापन - दिव्यकर्मा ।
यस्यैव सत्प्रेरणया विभाति, संस्थानकं सर्वसुखं वितन्वन् ।।५।।
अभिनन्दति रतिपूर्वं, सर्वानत्रागतान् सुजनान् ।
श्रीवृन्दावनवासी, शास्त्री वनमालिदासाख्यः ।।६।।
सभापतिर्योऽद्य हि सूरदास-, महाकवेः पंचशतीसभायाः ।
तन्माननेनैव हि सर्वमान-, स्तस्यैव संमाननमातनोमि ।।७।।
श्रीमोतिलालोऽपि च विज्ञवर्यो, विराजते भारतभूमिरत्नम् ।
विचारपूर्वं हि विलोक्य योऽसौ, रिसर्चकार्यं सफलीकरोति ।।८।।
विद्यानिवासो जयतीह यस्मिन्, विद्याःसमस्ता निवसन्ति नित्यम् ।
तिलेषु तैलं दधनीव सर्पि-, रिक्षुप्रकाण्डेषु सिता यथैव ।।९।।

श्रीवृन्दावनीयशोधसंस्थाने समवेतानां शिक्षामन्त्रिप्रभृतीनामभिनन्दनम्

वि॰ सं॰ २०३६

स जयति सुकर्णसिंहः, शिक्षामन्त्री सुभारतस्यापि ।
यस्यादेशात्पुनरपि, यास्यत्युच्चैर्हि वैदिकी शिक्षा ।।१।।

क्रियासिद्धौ ख्यातं भवति करणं साधकतमं
भवान् सच्शिक्षाया अपि करणसिंहःसुविदितः ।
अतः शिक्षामन्त्री भवति हि भवान् साधकतम–
स्ततो देवानां वागपि सुविपुलं यास्यति पदम् ।।२।।

स जयतिश्रीलकपीन्द्रः, कपीन्द्र इव रामचन्द्रस्य ।
दक्षःसत्सेवायां, दक्षः सत्काव्यकरणेऽपि ।।३।।

श्रीरामदासो जयतीह शोध-, संस्थान-संस्थापन–दिव्यकर्मा ।
यस्यैव सत्प्रेरणया विभाति, संस्थानकं सर्वसुखं वितन्वन् ।।४।।

कन्हैयालालगुप्तोऽयमुपाध्यक्षो विराजते ।
यस्य प्रेरणया सर्वं कार्यं चलति साम्प्रतम् ।।५।।

मन्त्रिणी पालिवालेयं नाम्ना प्रेमलता मता ।
विराजतेतरां सम्यक् सिञ्चन्ती प्रेमधारया ।।६।।

संशोधसंस्थानमहोत्सवेऽस्मिन्, समागता ये च महानुभावाः ।
या मातरश्चैव तथा भगिन्यः, सुस्वागतं सर्वजनस्य कुर्वे ।।७।।

श्रीदयानन्द-भार्गव-प्रशस्तिः

निर्माणकाल : वि० सं० २०३५

प्राचीन-वेश-भूषासु भारतीयासु निष्ठितः ।
प्राचां वाचामधिष्ठाता श्रीदयानन्दभार्गवः ।।१।।

दिल्ल्यामध्ययनं च 'रामजस' इत्याख्ये हि विद्यालये
तत्राऽऽध्यापनमेव चोपनिषदां श्रीविश्वविद्यालये ।
यस्याऽध्यापनरीतिकामतितरां शंसन्ति सर्वे जनाः
सोऽयं विज्ञवरः सदा विजयते वेदान्तसिद्धान्तभृत् ।।२।।

श्रीअवनीन्द्रो वाच-, स्पतिरपि यस्याऽऽस सहयोगी ।
सोऽयं जोधपुरस्थे, प्रस्थितो विश्वविद्यालये ।।३।।

रामजसश्रुतिगोष्ठ्यां, संशोधपत्रं हि प्रस्तुतं येन ।
सोऽयं कस्य न विदितो, भार्गवजःश्रीदयानन्दः ।।४।।

"शिशु–स्वभाववर्णनम्"

निर्माणकाल : वि० सं० २०३५

क्षणे क्षणे रोदनमातनोति, क्षणे क्षणे हास्यमथातनोति ।
कालद्वयं हर्षदमेव पित्रोः, शिशोश्चरित्रं सकलं विचित्रम् ॥१॥
शुष्कं रोदनमश्रुपातरहितं हास्यं विना कारणं
रम्यं क्रीडनकं विहाय विकलस्याऽन्यस्य संधारणम् ।
अन्यस्य प्रतिरोध-शोधरहितं चापल्यतो धावनं
ज्ञातुं को नु प्रभुः प्रभोरिव शिशोश्चित्रं चरित्रं चिरम् ॥२॥

श्रद्धाञ्जलिः

वि० सं० २०३६ भाद्र-शुक्ला पंचमी

श्रीसूरदास-स्मृतिकोत्सवेऽस्मिन् समागता ये तु महानुभावाः ।
श्रीमत्किशोरीशरणोत्सवेऽस्मिन्, समागता ये तु महानुभावाः ॥
या मातरश्चैव तथा भगिन्यः, सुस्वागतं सर्वजनस्य कुर्वे ॥१॥
राधावल्लभ-सम्प्रदाय-तिलकं श्रीसूरदासाऽऽह्वयं
लोके साधुशिरोमणिं गुणनिधिं जानन्ति नोके जनाः ।
कीर्तिं तस्य तु कोऽपि नैव सकलां वक्तुं क्षमो मानव-
स्तद् दिग्दर्शनमात्रमत्र करवै जानीत भोःसज्जनाः ॥२॥
जयति किशोरीशरणः, श्रीसूरदासाऽभिख्यया विदितः ।
यस्य चरित्रं चित्रं, चित्रं चित्ते हि चित्रयति ॥३॥
राधाष्टम्यां प्रतिशरदमेवाऽतनोदुत्सवं यः
साधून् विप्रानपि च सकलांस्तर्पयामास भोज्यैः ।
श्यामाकुञ्जं सरसविपिने शोभयामास नित्यं
तस्याऽभावे निखिलमपि वृन्दावनं शोचतीव ॥४॥
श्रीगीताया द्वादशाऽध्यायप्रोक्ताः, सर्वे पूर्णाःसद्गुणा यत्र चासन् ।
संगीतो यस्याऽद्भुत-प्रेमवर्षी, सोऽप्यस्मासु स्नेहवृष्टिं करोतु ॥५॥
सर्वेषु जीवनिवहेषु समानधर्मा, धर्मार्थ-जीवनधरोऽपि विचित्रयोगी ।
योगीशलब्धजनिराजनिरम्यकर्मा, कर्माणि यस्य सकलानि हरिप्रियाणि ॥६॥

य उत्तराखण्ड-सुलब्धजन्मा, जन्मादिनाऽलंकृत-मातृकर्मा ।
कर्माणि बाल्येऽपि हि यस्य सर्वं-, चित्राणि सोऽयं जयतान्महात्मा ॥७॥
उभयलोक-सुयोग्य-भिषग्वरः, सकल-जीवनिकाय-दयापरः ।
हित-सुधर्म-सुमर्म-सुभाषणः, सकलविज्जयतान्मृदुभाषणः ॥८॥

इन्द्रप्रस्थे यवनतनयां रोगमुक्तां चकार
वैदेशेऽपि स्थितनिजजनं मृत्युमुक्तं चकार ।
श्यामाकुञ्जं निजसुचरितैर्यः सदाऽलं चकार
सोऽयं जीयाज्जगति जनता प्रेमभारं बभार ॥९॥

प्रसन्नचित्तः सकलेष्टदाता, समस्त-प्राणि-प्रहितेषु लग्नः ।
उदारतायुक्त-सहिष्णुताढ्यः, स सूरदासो जयतान्महात्मा ॥१०॥

आचार्यत्वे जगति परमानन्ददासं महान्तं
यः स्वीचक्रे हरिसुभजने निष्ठितं तं नितान्तम् ।
नित्यं पश्याम्यहमिह जनान् मोदकैर्मोदयन्तं
तं वन्देऽहं जनिमृतिभयात् सज्जनान् मोचयन्तम् ॥११॥

शोके तु यो निजनान् विकलान् विधाय
कुञ्जे हरिं सुखयितुं दयिता-सुखाय ।
उक्त्वैव योऽन्तरदधान्निज-प्रेष्ठभक्तं
सोऽयं सदा जयति नित्य-निकुञ्जमध्ये ॥१२॥

श्रीसूरदास-विरहोत्सवके सभायां, सद्वैष्णवैः सुपरिदर्शित-दीनतायाम् ।
शोकेऽपि तद्गुणगणैः परिहर्षितायां, श्रद्धाञ्जलिं वितनुते वनमालिदासः ॥१३॥

श्रीलकिशोरीशरणः, सुमनोभिर्वाग्लता-निचितैः ।
परितुष्यतु दिव्यात्मा, दीने वनमालिदासेऽपि ॥१४॥

भक्तिप्रज्ञान-श्रीकेशवस्तोत्रम्

निर्माणकालः वि॰ सं॰ २०३६ पौषशुक्ला पंचमी

आचार्यो यस्य सिद्धो भुवि विदितयशा भक्तिसिद्धान्तसंज्ञः
श्रीमद्गौराङ्गदेवः परिकरसहितो यं स्वयं स्वीचकार ।

कृष्णप्रेष्ठस्वरूपोऽगति-गतिरपि यो गौरशक्तिस्वरूपो
भक्तिप्रज्ञान-संज्ञं यतिवरमहितं केशवं तं भजामः ।।१।।

आजन्म ब्रह्मचारी भवति हि भुवि यः श्रीगुरुर्यस्य तद्वत्
द्वावप्येतावधातां हरिरतिरहिते भक्तिवेदान्त-तत्त्वम् ।
गुर्वर्थे त्यक्तभोगो हरिगुरुयुगले भाव-भक्ति-प्रवीणो
भक्ति - प्रज्ञान - संज्ञं गुरुवरमनिशं केशवं तं भजामः ।।२।।

गौराविर्भावभूमौ प्रभुपदनिरतो श्रीलमायापुरे यो
भक्ति-श्रीवृद्धिकारी कमलमृदुतनुर्दीर्घवाहुर्विशालः ।
सौन्दर्येणाश्चितश्री र्निजपदनिरते मातृवात्सल्यकर्ता
भक्ति-प्रज्ञान-संज्ञं गुरुवरमनिशं केशवं तं भजामः ।।३।।

यं भावं कृष्णचन्द्रः कुरुभुवि नितरां दत्तवानर्जुनाय
यं वा श्रीद्वारकायां स्वगमनसमये संदिदेशोद्धवाय ।
कालाल्लुप्तं तमागात् पुनरपि कृपया दातुकामो जनाय
तस्मै नित्यं नमस्ते हरिमयवपुषे स्वामिने केशवाय ।।४।।

प्रभुपादकृपा-द्वारा, 'कृतिरत्न'—पदाश्चितः
पारमार्थिक-सत्यस्य, वक्ता निर्भीकतां गतः ।।५।।

वज्रादपि कठोरो यः, कुसुमादपि कोमलः ।
निज-सिद्धान्त-रक्षार्थं, पाखण्ड-गज-केसरी ।।६।।

प्रभुपाद-मनोऽभीष्ट—, सेवको गुरुनिष्ठकः ।
श्रीमद्गौरकिशोरस्य, धारा-संरक्षकश्च यः ।।७।।

गुरुसेवार्थमेतेन, कूरेशस्वामिना यथा
आदर्शो दर्शितस्तद्वत्, कोऽन्यो दर्शयितुं क्षमः ।।८।।

स्वरूपदामोदर-रायरामा—, नन्दस्य यो रूप-सनातनस्य ।
मताऽनुगत्यं रघुनाथकस्य, जीवस्य चक्रे बलदेवकस्य ।।९।।

संसार-दावानलतो ररक्ष, सद्भक्ति-पीयूष-सुवृष्टि- सृष्टया ।
जनान् निजान् वत्सलता-वशः सन्, तं केशवं देवमहं समीडे ।।१०।।

गौड़ीय-वेदान्त-समित्-प्रतिष्ठा, बृहन्मृदङ्गाकृति-यन्त्रनिष्ठा ।
कृता नवद्वीप उदारचेष्टा, यया नवीना नव-मन्दिरेष्टा ॥११॥
गौड़ीय-सिद्धान्त-मतिप्रदानि, प्रकाशितानीह सुपुस्तकानि ।
गौड़ीययुग्-भागवताख्यपत्रिका, प्रकाशिता भक्तसमूह-सौख्यदा ॥१२॥
वृषभानुसुता-प्रियता-प्रहित–, व्रजराजसुत-प्रियता-प्रहितः ।
नयन-प्रियतामदधादपि नः, प्रभुकेशवदेवममुं प्रणुमः ॥१३॥
भक्ति-प्रज्ञान-संज्ञस्य, केशवस्य स्तवं त्विमम् ।
ये पठन्ति नरा नित्यं, तेषु हृष्यति केशवः ॥१४॥
श्रीभक्तिसिद्धान्त-सरस्वतीति–, नाम्नां सुशिष्यस्य चकार भक्त्या ।
स्तोत्रं त्विदं केशवसंज्ञकस्य, महाकविः श्रीवनमालिदासः ॥१५॥
षड्-राम-शून्य-कर-सम्मित-विक्रमाऽब्दे, वृन्दावने रविदिने शुभ-पौष-शुक्ले ।
वृन्दाटवी-वसति-लब्ध-कवित्व-शक्तिः,स्तोत्रं त्विदं रचितवान् वनमालिदासः॥

श्रीवृन्दावनीय-श्रीटोपीकुञ्जाध्यक्षस्य महतः श्रीसनत्कुमारदासस्य नित्यनिकुञ्ज–प्रवेश-महोत्सवे

पठिताः कविताः—वि० सं० २०३५ पौषी पूर्णिमा

श्रीमन्माधवदासं, पूर्वंमहान्तं हि टोपीकुञ्जस्य ।
श्रीभक्तमालिकायाः, कथकं सततं नमस्यामि ॥१॥
बहुशो दृष्टचरं तं, चरन्तं वृन्दाविपिन-कुञ्जेषु ।
महतां सेवानिरतं, विरतं, संसार-पुञ्जेषु ॥२॥
तदनु च विषय-विरक्तं, रक्तं श्रीराधिका-चरणे ।
नुमो महान्तं सरलं, श्रीलसनत्कुमारदासं हि ॥३॥
सनत्कुमारो भगवान्, कुमार इव सर्वदा ।
सनत्कुमारदासोऽपि, तथा वृद्धोऽपि भाषितैः ॥४॥
सदा निकुञ्ज - वासकं, सराधकृष्णदासकम् ।
सनत्कुमारदासकं, नमामि सत्प्रहासकम् ॥५॥
निकुञ्जसेवानिरतस्य नित्यं, सतां हि सेवास्वपि यस्य चित्तम् ।
सनत्कुमारः स श्रिनोतु सर्वान्, साधून् स्वशिष्यांश्च निरस्तगर्वान् ॥६॥

अभिनन्दति रतिपूर्वं, नित्यनिकुञ्जे विराजमानं तम् ।
श्रीवृन्दावनवासी, शास्त्री वनमालिदासाख्यः ।।७।।
श्रीलमाधुरीशरणः, श्रीराधेश्यामदासश्च ।
राधाब्रजेशशरणः, सर्वेऽप्येते सुधन्या भोः ! ।।८।।
श्रीमन्मुकुन्दशरणादिक-विज्ञवर्या, गर्वीलिदेवि - शरणादिकसाधुवर्याः ।
अन्येऽपि ये च गृहिणो धनिनो विरक्ता-,स्टोपीनिकुञ्जशरणाः सकला हि धन्याः।।

श्रीवृन्दावन की महिमा का कवित्तः— वि० सं० २०३६

श्रीवृन्दावन धाम ! तेरी महिमा को कौन कहे
तेरे जो विहारी जू हैं वेहू याते हारे हैं ।
वेही वनमाली जाकी लीला है निराली अहो !
ते हू बहुबार आप मन में विचारे हैं ।।
तेरे तृण फलन को आस्वाद लेन हेतु
स्वयं वत्स ग्वालबाल बनिके पधारे हैं ।
ब्रह्म-मोह लीला में ये भाव सो दिखाय दियो
याते 'वनमालिदास' तो ही पै जू वारे हैं ।।१।।

श्रीरेवती-स्तोत्रम्

निर्माणकाल : वि० सं० २०३६ माघ कृष्णा एकादशी

सत्ये युगे प्रथमकेऽपि जनिर्यदीया,
वैवाहिकी शुभक्रिया बहुद्वापरान्ते ।
वृद्धाऽपि या भवति भो ! नवयौवनढ्या,
तां रेवतीं बलवतीं प्रणमामि नित्यम् ।।१।।
आदाय यां स्वतनयां गतवान् ककुद्मी, ब्रह्मालयं वरमवाप्तुमवेत्य यस्याः ।
आगत्य यामिह समर्पितवान् बलाय, तां रेवतीं बलवतीं प्रणमामि नित्यम् ।।२
कुब्जा कृता सरसवेणुधरेण ऋज्वी, तद्वत् कृता हलधरेण हलेन ह्रस्वा ।
भ्रात्रोर्द्वयोरपि च या बहुमाननीया, तां रेवतीं बलवतीं प्रणमामि नित्यम् ।।३
यस्या जनिः समभवत् किल सूर्यवंशे, वैवाहिकी शुभक्रियापि च चन्द्रवंशे ।
वंशद्वयं निजयशोभिरलं चकार, तां रेवतीं बलवतीं प्रणमामि नित्यम् ।।४।।

या सेवनादखिलमङ्गलमातनोति, या कीर्तनाद् हलधरस्य सुखं करोति ।
या प्रह्वणान्निज-जनस्य धनं सुनोति, तां रेवतीं बलवतीं प्रणमामि नित्यम् ॥५
मूर्त्तेव या सरलता करुणैव मूर्त्ता, वात्सल्यमूर्तिरिव भक्तजनेषु वित्ता ।
भक्तिं ददाति बल-कृष्ण-पदारविन्दे, तां रेवतीं बलवतीं प्रणमामि नित्यम् ॥६
सौशील्य-धैर्य-बहु-मार्दवतादियुक्ता, मात्सर्यरोग-रहिता महितापि नम्रा ।
शक्तिं समर्पयति या बलभक्तलोके, तां रेवतीं बलवतीं प्रणमामि नित्यम् । ७॥

यामाराध्य नरो निमज्जतितरामानन्द-सिन्धौ सदा
यां प्रेक्ष्यापि नरस्य नैव पतनं संसार-सिन्धौ क्वचित् ।
यामानम्य नरो न रोदिति भवे भावे निमग्नो भवेत्
तां श्रीमद्बलराम-पादनिरतां सेवस्व भो रेवतीम् ॥८॥

श्रीरेवती-स्तवमिमं भुवि ये मनुष्या, नित्यं पठन्ति सरसं बलदेव-प्रीत्यै ।
भुक्त्वा बलस्य कृपया भुवि सर्वसौख्यं, सम्प्राप्स्यते सुखतया बलसन्निधिस्तैः ॥

षड्-राम-शून्य-नयनैश्च मिते हि वर्षे, श्रीविक्रमार्क-नृपतेरपि माघमासे ।
वृन्दाटवी-वसति-लब्ध-कवित्व-शक्तिः,स्तोत्रं त्विदं रचितवान् वनमालिदासः॥

'श्रीरसिकप्रशस्तिकणिका' निर्माणकाल : वि० सं० २०३६

श्रीहरिगुरुवैष्णव-पदारविन्दद्वन्द्व-मकरन्द-पानोन्मत्तमिलिन्दवृन्दवर ! वरचरित ! चरितानुरञ्जितसाधुलोक ! लोकख्यात ! ख्यात-यशः शीतकर ! करकमलोपलालित-निजसेवकवृन्द ! वृन्दशः सेवितवृन्दावन ! वृन्दावनचन्द्र-रसिक ! रसिकवर ! विज्ञवररसिकविहारिन् ! प्रणतिततिपुरःसरं सप्रश्रयं विज्ञप्तिरियं यदहं श्रीमत्तातचरणरोपित-कल्पलता-कवितासरसमञ्जरी-माधुरीमास्वाद्य द्वित्राणि वचनानि भणानि, तानीमानि सादरं दृग्गोचरी-करिणीयानि—

रसिकविहारी जोशी, योगी योगीश-सत्पुत्रः ।
स जयति धीराधारो, रासोपरि रासवर्षी यः ॥१॥

मुख्यो बुधो जयति मे रसिको विहारी, हारी च सर्वमनसां खलु जन्मयोगी ।
योगीश-लब्धजनिराजनिरम्यकर्मा, कर्माणि यस्य सकलानि हरिप्रियाणि ॥२॥

रामप्रतापशास्त्री, शास्त्रेषु सर्वेषु निष्णातः ।
आसीदद्भुतयोगी, श्रीकृष्णायार्पिताऽऽत्मा च ॥३॥
लोकोत्तरं कवित्वं च, यस्याऽऽस्ते भक्ति–भावितम् ।
यद् दृष्ट्वा भक्तविदुषां, प्रसीदतितरां मनः ॥४॥
विदुषां न च विद्वांसो, दृष्टा लोकेहि सूनवः प्रायः ।
रसिक – विहारी जोशी, रामप्रतापं प्रकाशयति ॥५॥
यङन्त-यङ्लुगन्तस्य, प्रयोगाणां तु सन्ततिः ।
यथा रसिककाव्येषु, तथा नान्येषु दृश्यते ॥६॥
यङन्त-यङ्लुगन्तानां, नामधातूनां प्रयोग-प्राचुर्यम् ।
रामप्रताप-रसिकयोः, काव्येष्वेव दृश्यते नान्येषाम् ॥७॥
गोपालचम्पूमनुभट्टिकाव्ये, विलोक्यते यद्यपि तत्समस्तम् ।
परन्तु तद् व्याकरणं प्रधानं, विलक्ष्य प्रोक्तं नहि काव्यमात्रम् ॥८॥
युष्मत्कृतानि निखिलानि सुपुस्तकानि, देयानि यानि विदुषां मनसां सुखानि ।
अस्यैव हस्तयुगले मम पत्रदातु–र्दृष्ट्वैव तानि मुदितोऽहम लं भवानि ॥९॥
रसिकविहारो जोशी, निजकरकमले समर्पितां दृष्ट्वा ।
चम्पूमेतामतलां, टीकयितरि सुप्रसन्नोऽस्तु ॥१०॥
रसिकविहारी जोशी, निजकरकमले समर्पितं कर्त्रा ।
भवतु विलोक्य सुमुदितः, श्रीहरिप्रेष्ठं महाकाव्यम् ॥११॥
रसिकविहारो जोशो, निजकरकमले समर्पितं कर्त्रा ।
भवतु विलोक्य सुमुदितो, वनमालिप्रार्थनाशतकम् ॥१२॥
यस्याऽऽस्ते करुणा कटाक्षलहरो जीवेषु भक्तेषु वै
यश्चक्रे च करोति मुग्धजनताया मोहभङ्गं सदा ।
विज्ञत्वं खलु यस्य सर्वविदितं सौम्यत्वमप्यद्भुतं
सोऽयं विज्ञवरः सदा विजयते रामप्रतापोद्भवः ॥११॥
अभिनन्दति रतिपूर्वं, रसिकविहारिणं सर्वशास्त्रज्ञम् ।
श्रीवृन्दावनवासी, शास्त्री वनमालिदासाख्यः ॥१४॥

"भक्तिप्रियो वल्लभः" इति समस्यापूर्तिः

पूर्तिकालः वि० सं० २०३६

श्रीमल्लक्ष्मणभट्टसूरि-तनयो यो वह्निरूपाऽन्तरः
काष्ठाद् वह्निरिव स्वयं प्रकटितो योऽयोनिजःश्रूयते ।
भक्तिं यश्च तनान विश्वविदितः श्रीनाथपादाश्रितः
सोऽयं विज्ञवरः सदा विजयते भक्तिप्रियो वल्लभः ॥१॥

श्रीमद्भावतेन सार्धमपि यः प्रस्थानतुर्यं व्यधात्
टीकां यश्च सुबोधिनीं सुविदितां ग्रन्थान् बहून् भक्तिदान् ।
भाष्यं यश्च हि ब्रह्मसूत्रनिचये नाम्नाऽणुकं ज्ञानदं
सोऽयं विज्ञवरःसदा विजयते भक्तिप्रियो वल्लभः ॥२॥

शुद्धाद्वैतमत-प्रचारणपरः श्रीविष्णुमार्गे रतः
शिष्यान् यश्च चकार विश्वविदितान् श्रीसूरदासादिकान् ।
तीर्थोद्धारपरश्च यो व्रजभुवः पारिक्रमं चाप्यधात्
सोऽयं विज्ञवरःसदा विजयते भक्तिप्रियो वल्लभः ॥३॥

रासारम्भमथाऽकरोन्मधुपुरे यो माथुरैर्बालकै
रासं तेऽपि विधाय चाऽन्तरदधुः श्रीयामुने वारिणि ।
चातुर्वेद-सुविप्र-याचन-वशाद् योऽदर्शयत् तान् पुनः
योऽयं विज्ञवरः सदा विजयते भक्तिप्रियो वल्लभः ॥४॥

द्वापञ्चाशदिकश्च भावविपुलां प्राचार्य भक्तिं भुवि
काश्यामेव तिरोऽदधात् सतनुको गाङ्गे जले निर्मले ।
कीर्तिं यस्य तु कोऽपि नैव सकलां वक्तुं क्षमो मानवः
सोऽयं विज्ञवरः सदा विजयते भक्तिप्रियो वल्लभः ॥५॥

अभिनन्दति रतिपूर्वं, श्रीलश्रीवल्लभाचार्यम् ।
श्रीवृन्दावनवासी, शास्त्री वनमालिदासाख्यः ॥६॥

श्रीराधा-कृष्ण-विवाह-पद्धति-सम्मतिः

निर्माणकालः वि० सं० २०३६

मिश्रेत्युपाधियुक्ते सनाढ्यकुलमौलिना ।
कर्मकाण्डस्य सूर्येण याज्ञिकानां सुधांशुना ॥१॥
भोलानाथस्य पौत्रेण शिवलालस्य सूनुना ।
लिखिता गिरिराजेन श्रीवृन्दावनवासिना ॥२॥

चतुर्णां वेदानां भवति किल यत् स्वस्तिवचनं
तदस्यामेवाऽऽस्ते विवहनमयी पद्धतिरियम् ।
मुदा वृन्दारण्ये विबुधगिरिराजेन लिखिता
ततः सर्वैर्ग्राह्या निजनिजसमाधानविधये ॥३॥

प्रकाशने जाततरा अशुद्धी-, रुपेक्ष्य संशोध्य विलोकनीया ।
एषा शुभा पद्धतिरेवमाह, महाकविः श्रीवनमालिदासः ॥४॥

"रङ्गनाथोत्सवः" इति समस्यापूर्तिः

निर्माणकाल : वि० सं० २०३६

वेदत्रयी-पण्डित-मण्डितेयं, सभा विचित्रा सरसा विभाति ।
सभापतित्वं च सुशोभयन्ति, अण्णङ्गराचार्य-महानुभावाः ॥१॥
श्रीरङ्गनाथस्य महोत्सवेऽस्मिन्, समागता ये तु महानुभावाः ।
या मातरश्चैव तथा भगिन्यः, सुस्वागतं सर्वजनस्य कुर्वे ॥२॥

यं द्रष्टुं बहवो जनाः परिकरैरायान्ति दिग्भ्यःसदा ।
दृष्ट्वाऽऽनन्दपुरःसरं सनमनं नृत्यन्ति गायन्ति च ॥
हर्षोल्लास-परम्परा-परिचितः सद्वैष्णवैः संस्तुतः ।
सोऽयं श्रीविपिने सदा विजयते श्रीरङ्गनाथोत्सवः ॥३॥

यत्र स्यन्दन-मेलनं प्रतिसमं संजायते श्रीहरेः ।
सौवर्णादिक-वाहनैरतितरां शोभा विचित्रा भवेत् ॥
गोष्ठीभिर्विदुषामनेक-विषये शास्त्रार्थ-संचारणैः ।
सोऽयं श्रीविपिने सदा विजयते श्रीरङ्गनाथोत्सवः ॥४॥

श्रीरङ्गादिक-देशिका बुधवरा यस्याऽऽदिमाश्चालकाः ।
श्रीमद्बालकस्वामिनोऽपि सरला विद्वत्तमा आसते ॥
येषां प्रेरणयाऽधुनाऽपि सकला संचाल्यते प्रक्रिया ।
सोऽयं श्रीविपिने सदा विजयते श्रीरङ्गनाथोत्सवः । ५॥
राधाकृष्णवणिग्वरस्य च तथा श्रीलक्ष्मिचन्द्रस्य च ।
द्रव्येणैव विनिर्मितं सुविपुलं यन्मन्दिरं सुन्दरम् ॥
ख्यातिश्चोत्तरभारतेऽपि विपुला यस्यैव नाम्ना बुधाः ।
सोऽयं श्रीविपिने सदा विजयते श्रीरङ्गनाथोत्सवः ॥६॥
अभिनन्दति रतिपूर्वं, सर्वानत्राऽऽगतान् विदुषः ।
श्रीवृन्दावनवासी, शास्त्री वनमालिदासाख्यः ॥७॥

उत्तरप्रदेश-संस्कृत-अकादमी द्वारा समायोजिते श्रीवृन्दावनान्तर्गत आनन्दवृन्दावने जायमाने श्रीमद्भागवत-संगोष्ठी-महोत्सवे समवेतानां सर्वेषां महानुभावानां

स्वागताभिनन्दनम्

वि० सं० २०३६

श्रीमद्भागवतं नौमि समस्तरस-बृंहितम् ।
स्वेच्छानुसारं स्वेष्टो हि रसो यत्र निपीयते ॥१॥
अखण्डानन्दपूर्णो मेऽखण्डानन्दसरस्वती ।
विराजतेतरां यस्य वाचि नित्यं सरस्वती ॥२॥
स जयति बदरीनाथो, बदरीनाथ इव सर्वसम्पूज्यः ।
कुलपतिरतिशय-विदितो, विदितःशास्त्रार्थसारनिचयेषु ॥३॥
स जयति रासविहारी, गोस्वामी शास्त्र-मर्मज्ञः ।
यस्य दयालवबलतो, बललवहीनोऽप्यहं सबलः ॥४॥
स विश्वनाथो जयतीह विश्व-विराजिनी राजति यस्य भाषा ।
वृन्दावने लब्धमहोदयोऽपि, विराजते सम्प्रति लक्ष्मणे पुरे ॥५॥
स जयति रामादर्शो, राम इवाऽऽदर्श आचारे ।
यो वृन्दावनमध्ये, प्राचार्यो रङ्ग आदर्शो ॥६॥

विदुषी केरलवासिनी, विनम्रा प्रेमलताऽऽह्वया जयति ।
या सङ्गीते दक्षा, दक्षा भक्ति-प्रवचनेऽपि ।।७।।

विद्यानिवासो जयतीह यस्मिन्, विद्याः समस्ता निवसन्ति यस्मिन् ।
तिलेषु तैलं दधनीव सर्पिः, पयो यथा गोषु भुवीव चान्नम् ।।८।।

श्रीवासुदेवः खलु कृष्णचन्द्रः, विद्यानिवासश्च हि मिश्रवर्यः ।
द्वौ यत्र संयोजकतां प्रयातौ, न तत्र किंचित् परिहास्यते भोः ।।९।।

नानादेशभुवां नृणां भुवि यथा दिल्यां हि सम्मेलनं
श्रीमद्‌भागवते समस्त-निगमार्थानां हि सम्मेलन ।
सर्वेषां पयसां समुद्रसलिले यद्वद्धि सम्मेलनं
तद्वत् सत्प्रतिभाजुषां हि विदुषामद्याऽस्ति सम्मेलनम् ।।१०।।

वाराणसीतस्तु समागता ये, समागता ये च प्रयागराजात् ।
ये वाऽऽगरातश्च समागताःस्यु, समागता ये च तथेन्द्रप्रस्थात् ।।११।।

समागता ये मथुरापुरीतो, वृन्दावनाद् ये च महानुभावाः ।
या मातरश्चैव तथा भगिन्यः, सुस्वागतं सर्वजनस्य कुर्वे ।।१२।।

येषामहं वेद्मि न नामधेयं, न रूपधेयं न च भागधेयम् ।
समागता येऽत्र महानुभावाः, सर्वानहं तानपि पूजयामि ।।१३।।

अभिनन्दति रतिपूर्वं, सर्वानत्राऽऽगतान् विदुषः ।
श्रीवृन्दावनवासी, शास्त्री वनमालिदासाख्यः ।।१४।।

श्रीसूर्यदेव-नमस्कारः । वि० सं० २०३५

दुर्योधनेनैव दुरोदरेण, निर्वासितायैव युधिष्ठिराय ।
पात्रं प्रदत्तं भुवनोपभोज्यं, तस्मै नमः सूर्यमहोदयाय ।।१।।

'निष्कामकर्मयोग-प्रशंसा' वि० सं० २०३६ कार्तिक शुक्ला पंचमी

निष्कामःकर्मयोगो भवति हि भगवत्प्रीति-सम्प्राप्ति-योग्यो
निष्कामः कर्मयोगो जनन-मरणजं बन्धनं नो करोति ।
निष्कामे कर्मयोगे जनक-प्रभृतयो भूभुजोऽतः प्रवृत्ता-
स्तस्मान्निष्कापूर्वः प्रसरतु नितरां कर्मयोगाङ्क एषः ।।१।।

अष्टोत्तरशतश्रीभागवत-पारायणे प्रोक्ता कविता

निर्माणकालः वि० सं० २०३७ अधिक ज्येष्ठ

स जयति नरहरिदासो, मूर्तिस्त्यागस्य वीतरागश्च ।
यस्योद्यम-वशवर्ती, महोत्सवोऽयं शुभो मुहुश्चलति ।।१।।
स जयति चैनविहारी, नरहरिदासेन सेवित सततम् ।
यस्य दयालव-बलतः, सर्वे बलिनो भवन्ति सन्मार्गे ।।२।।
यस्य पिता शिवकरणो, माता गोदावरी धन्या ।
स जयति भोलारामः, श्रीजाखोदिया-वंश-सदवतंसः ।।३।।
पत्नी यस्य सदा पतिव्रतपरा सौम्याऽऽकृतिःसत्कृतिः
साधु-ब्राह्मण-सेवनेऽतिनिपुणा नाम्ना सितारा मता ।
पुत्रौ यस्य गुरुप्रसाद-जनितौ योगेश-कृष्णौ मतौ
भोलारामवणिग्वरः स जयतादौदार्यमूर्तिः सदा ।।४।।

श्रीवेङ्कटेशचरिते सम्मतिः

निर्माणकालः वि० सं० २०३७ आषाढ शु० एकादशी

राधाकृष्णवणिग्वरस्य च तथा श्रीलक्ष्मिचन्द्रस्य च
द्रव्येणैव विनिर्मितं सुविपुलं यन्मन्दिरं सुन्दरम् ।
ख्यातिश्चोत्तरभारतेऽपि विपुला यस्यैव नाम्ना मता
वन्दे तं परमेश्वरं प्रतिदिनं श्रीरङ्गनाथं हरिम् ।।१।।
श्रीगोदारङ्गनाथः स जयति नितरां भक्तवश्यः सदैव
श्रीरङ्गाचार्यवर्यः प्रकटितमकरोद् यस्य सद्दिव्यदेशम् ।
रङ्गाचार्यद्वितीयो मठपतिरभवद् दिव्यगोवर्धनाख्य-
स्तस्यैवाऽधीनशिष्यो लघुमतिरतनोद् वेङ्कटेशस्य वृत्तम् ।।२।।
मिश्रो युगलकिशोरः, पुत्रःश्रीगोपालप्रसादस्य ।
रङ्गमन्दिर - पुरोधाश्चरितमलिखद् वेङ्कटेशस्य ।।३।।
यत्प्रेरणालवबलेन विटंकितं भोः, दिव्यं बुधा ! नरगिरा सकलप्रगेयम् ।
तस्मै समर्प्यत इदं चरितं तदीयं, श्रीवेङ्कटेशहरयेऽस्तु तदीय-प्रीत्यै ।।४।।

श्रीचक्रपाणिशरण–स्तुतिः

निर्माणकालः वि० सं० २०३६

लेभे जन्म सुरार्चितं द्विजकुले नेपाल-देशे शुभे
माता यस्य तु सच्चरित्र-जननी राधाऽभिधा शोभना ।
औपाध्याय-पदेऽभिषिक्त-जनको विष्णुप्रसादाऽऽह्वय-
स्तं श्रीमद्गुरु-चक्रपाणिशरणं नित्यं भजामो वयम् ॥१॥
रामाऽङ्ग-ग्रह-काश्यपी-परिमिते श्रीवैक्रमाब्दे शुभे
श्रीवैकुण्ठ-चतुर्दशी-तिथिवरे पक्षे सिते कार्तिके ।
'लामेडाँड़' इति प्रसिद्धनगरे श्रीरेवतीभेऽभवद्
यस्तं श्रीगुरुचक्रपाणिशरणं नित्यं नमामो वयम् ॥२॥
कौमारे द्विजसंस्कृतिं च समगाद् यज्ञोपवीतादिना
पौगण्डे समधीतिमेत्य नितरां शास्त्रप्रवेशात्मिकाम् ।
त्यक्त्वा गेहमुपाययौ हरिमना भावेन वृन्दावनं
यस्तं श्रीगुरुचक्रपाणिशरणं नित्यं स्मरामो वयम् ॥३॥
श्रीवृन्दावनमेत्य वृत्तिमदधाद् वैराग्य-भावात्मिकां
स्नात्वा प्राग् रजसि व्रजस्य तदनु श्रीयामुने वारिणि ।
दृष्ट्वा श्रीलविहारिणं मुदमगात् स्तुत्यादिभिः प्रीणयन्
यस्तं श्रीगुरुचक्रपाणिशरणं नित्यं भजामो वयम् ॥४॥

ग्रहीतुं वैष्णवीं दीक्षां चेत आकुलितं भृशम् ।
श्रीमद्भागवतं श्रुत्वा पठित्वा च विशेषतः ॥५॥
विशेष-विदुषः पश्चात् श्रीनिम्बार्कपथानुगात् ।
गृहीता वैष्णवी दीक्षा विधिपूर्वकमादरात् ॥६॥
श्रीरामचन्द्रदासाख्या येषामासीत् पुरा प्रथा ।
तेऽपि मे गुरवो वन्द्या राम-कृष्णैक्य-शंसकाः ॥७॥
सर्वशास्त्रेषु निष्णाता हंस-वंश-प्रशंसकाः ।
संशयच्छेदने दक्षा श्रीनिम्बार्कपथानुगाः ॥८॥

आचार्या हि हरिप्रियाशरणकाः सौम्य-स्वभावा मताः
यस्य श्रीवृषभानुजाचरणयोः श्रीनन्दसूनोस्तथा।
आसीत् प्रेम परम्परा-परिचितं भावानुसारं वरं
तं श्रीमद्गुरुचक्रपाणिशरणं नित्यं भजामो वयम् ॥९॥

श्रीमद्भागवतादि-शास्त्रनिवहे श्रीवैष्णवैः सम्मते
वाणीग्रन्थचये व्रजस्य रजसि श्रीयामुने वारिणि।
निष्ठाऽपूर्वतरा सदैव ववृधे ह्येकादशीजे व्रते
यस्य श्रीगुरुचक्रपाणिशरणं नित्यं भजामो वयम् ॥१०॥

यस्य श्रीलगुरौ तथा गिरिवरे गोवर्धने कृष्णवद्
आसीद् भाव उदारता जनगणे श्रीवैष्णवै बन्धुवत्।
नाम्नि श्रीहरिवत् प्रसाद-निवहे सद्ब्रह्मवद् भावना
तं श्रीमद्गुरुचक्रपाणिशरणं नित्यं भजामो वयम् ॥११॥

श्रीराधिकादास इति प्रसिद्धः, शिष्यस्तु यस्याऽभवदात्मनिष्ठः।
यो ज्ञान-वैराग्य-सुभक्तिलीनः, कस्तत्स्वरूपं विबुधोऽपि वेद ॥१२॥

यद्भाषणं मृदुपदं सुहृदां जनानां, दुःखी भवत्यतितरां स्मरतां हि चेतः।
यो भाव-पद्धतिमुवाच निजाऽन्तरङ्गे, तं चक्रपाणिशरणं सुहृदं प्रपद्ये ॥१३

सप्ताग्नि-शून्य-कर-सम्मित-विक्रमाब्दे,एकादशीदिन उताऽऽश्विन-शुक्लपक्षे।
श्रीराधिका-हरि-निकुञ्जमवाप हर्षात् तं चक्रपाणिशरणं शरणं प्रपद्ये ॥१४

वृन्दावने हरिरवाप्य निकुञ्जमाप्तां, स्वां सेविकां सहमुदं यमुनाप्रियाख्याम्।
स्वीकृत्य तां मिलनपूर्वमथाऽऽयुयोज, तन्नित्य-सिद्ध-यमुनाजल-सेविकायाम् ॥

श्रीचक्रपाणिशरण-स्तुतिमात्महर्षात्, तच्छिष्य-सेवक-चतुर्भुजदास-तर्षात्।
वृन्दाटवी-वसति-लब्ध-कवित्वशक्तिः-प्रादुश्चकार समुदं वनमालिदासः ॥१६

चतुरशीतिक्रोशात्मकस्य व्रजमण्डलस्य परिक्रमान्ते श्रीवृन्दावने
दीयमानं श्रीमद्वल्लभसम्प्रदायाचार्याणां श्रीमाथुरचतुर्वेदानां
श्रीविष्णुदत्तात्मजानां श्रीविठ्ठलेश-महोदयानां

अभिनन्दन-पत्रम्

निर्माणकाल : वि० सं० २०३७ मार्गशीर्ष पूर्णिमा

श्रीविठ्ठलेशेन नियोजितेऽस्मिन्, महोत्सवे सद्विदुषां समाजे ।
व्रजप्रदेशस्य प्रदक्षिणायां, प्रदक्षिणीकृत्य समागतेन ।।१।।
समागता ये मथुरापुरीतो, वृन्दावनाद् ये च महानुभावाः ।
ये वाऽन्यतश्चैव समागताः स्युः, सुस्वागतं सर्वजनस्य कुर्वे ।।२।।
प्रदक्षिणीकृत्य व्रजप्रदेशं, समागता ते तु समं समन्तात् ।
या मातरश्चैव तथा भगिन्य-, स्तासामपि स्वागतमेव कुर्वे ।।३।।
नानादेशभुवां नृणां भुवि यथा दिल्ल्यां हि सम्मेलनं
श्रीमद्भागवते समस्तनिगमार्थानां हि सम्मेललनम् ।
सर्वेषां पयसां समुद्रसलिले यद्वद्धि सम्मेलनं
तद्वत् सत्प्रतिभाजुषां हि विदुषामत्रास्ति सम्मेलनम् ।।४।।
श्रीविष्णुना साधु समर्पितायां, श्रीवल्लभाचार्य-सुसंस्कृतायाम् ।
तत्सम्प्रदायस्य सुवाटिकायां, विराजते सम्प्रति विठ्ठलेशः ।।५।।
श्रीमद्वल्लभभट्टपद्धतिमिमां यः संस्करोत्यद्भुतां
श्रीमद्वल्लभभाष्य-सन्ततिमलं जानाति विद्वत्तया ।
अन्यान् बोधयति स्वशिष्य-निवहान् सम्यक्तया भावतः
स श्रीविज्ञवरः सदा विजयते श्रीविठ्ठलेशः कृती ।।६।।
चातुर्वेद-सुवंशजान् निजजनान् स्वीये प्रबन्धे स्थितान्
सौख्ये स्थापयितुं स्वयं निजसुखं हित्वापि शारीरकमम् ।
कष्टं सोढुमयं परिक्रमणजं यद्यप्यनर्हः कृती
माधुर्यात् तदपि स्वयं प्रथयते यौधिष्ठिरीं प्रक्रियाम् ।।७।।
परिक्रमणमेव भो ! चतुरशीति-क्रोशात्मकं
व्रजस्य भवति प्रियं सकलतीर्थ-पुण्यप्रदम् ।

करोति हि प्रदक्षिणं व्रजभुवं जनो यो मुदा
न याति स हि योनिषु चतुरशीतिलक्षात्मसु ।।८।।
भवता तु कृता प्रदक्षिणा, समुदं माथुरगोपिका-जनैः ।
अनया ननु विठ्लेश भोः, स्वकुले कीर्तिकुलं प्रसारितम् ।।९।।
श्रीरज्जूजीमहाराज-,योगिराजादनन्तरम् ।
पीठस्थो ह्यभवद् धीमान्, विष्णुदत्तो महायशाः ।।१०।।
तदात्मजवरस्ततो भवति तत्र पीठाधिपः
स एव तु धिनोति नः सदसि विट्ठलेशः सुधीः ।
तदीयचरितं सितं भवति कस्य नो हृत्सितं
यदीयमवलोकनं भवति सन्मनो-लोभनम् ।।११।।
सरलता-वनिता मनसि स्थिता, व्रजति या न कदापि कठोरताम् ।
मधुरमूर्तिरयं सकलाञ्जनान्, वशयतिस्म ततः कठिनानपि ।।१२।।
अभिनन्दति रतिपूर्वं, विष्णुदत्तात्मजं श्रीविठ्ठलेशम् ।
श्रीवृन्दावनवासी, शास्त्री वनमालिदासाख्यः ।।१३।।

शुभसम्मतिः वि० सं० २०३७

श्रीरामेश्वरदत्तशर्मलिखितं वृत्तं तु यत्संस्कृतं
सर्वेषां प्रतिभाजुषां हि विदुषां श्रीहारियाणाभुवाम् ।
तद् दृष्टं वनमालिदासकविना श्रीभारत-ख्यातिना
वासग्रामविभूतिना शमधुना वृन्दावने वासिना ।।१।।
श्रीरामेश्वरदत्तो, हरियाणा-संस्कृतं वृत्तम्
व्यलिखत् सुचिरं रुचिरं, पठनीयं सर्वदेशस्थैः ।।२।।
भाषायामपि व्यलिखद्, भाषावेत्तुर्जनस्य कृते
सर्वेषामुपकारो, यथास्यादितिसुविचारधिया ।।३।।
इतिमयाप्यनुभूय विलिख्यते, कृतिरियं न मुधैव प्रशस्यते ।
इतिविचार्य विचारचणा जना, अपि पठन्तु रमेश्वर-भावितम् ।।४।।
इदं सुवृत्तं हरियानजातं, विलोकयामास समं समन्तात् ।
संशोधयामास च सर्वमेव, महाकविःश्रीवनमालिदासः ।।५।।

श्रीमध्यप्रदेशमुख्यमन्त्रिणे दीर्घजीविने राजाधिराज-श्रीअर्जुनसिंहनामिने शुभाशीर्वाद–पत्रम् निर्माणकालः वि० सं० २०३७

मध्य-प्रदेशस्य हि मुख्यमन्त्री, श्रीअर्जुनो नाम सुवीरसिंहः।
चिरं स जीयात् सुयशाः सुचेता, यावद् धरा चन्द्रदिवाकरौ च ॥१॥

एकादशाक्षौहिणिकं बलं पुरा, यथा पराजित्य स पाण्डुनन्दनः।
रराज राज्ये निजशौर्य-संयते, तथा भवानद्य विराजतेतराम् ॥२॥

अर्जुनस्य यथाः कीर्तिर्महाभारत-मध्यगा।
विपक्षच्छेद-दक्षस्य भवतोऽपि तथा नृप ! ॥३॥

विपक्ष-पक्ष-छेदको यथार्जुनोऽभवत् पुरा।
स्वपक्ष-रक्षण-क्षमस्तथाऽद्य भो भवानपि।
सुभारतेतिहासके यथा यशस्तदीयकम्
सुवर्णवर्ण–सञ्चितं तथा तवाऽपि वर्तते ॥४॥

अर्जुनेन यथा ख्यातिं गमितं हस्तिनापुरम्।
रीमान्तर्भवता तद्वच्चुर्हट-सीधिकाभिधम् ॥५॥

रन्तिदेव इवोदारो ययातिरिव धार्मिकः।
दाता कर्ण इव श्रीमान् दयी जीमूतवाहनः ॥६॥

उदासीनो जन्मावधि भवरसाद् भक्तिमधुरो
वदान्यो मान्यो वा शिविसम उताहो वलिरिव।
अमानी मानेनाऽपरजनगणं मानयति यः
सतां सेवालीनः स हि मम नरेशो विजयताम् ॥७॥

पूर्वजानां यशोरूप-ध्वजदण्डसमो भवान्।
कीर्तिस्तवसुविख्याता पितृभक्तिमतामिव ॥८॥

न याचकाः कौ विमुखाः प्रयाता, कदापि ते वंशपरम्परेयम्।
सुपालयंस्तामपि भो भवान् स्वां, विराजतामत्र हि मुख्यमन्त्री ॥९॥

निर्वाहयन् क्षात्रधर्मं कुर्वन् भो देशरक्षिकाम्।
पृथिव्यां कल्पवृक्षः सन् चिरमेव विराजताम् ॥१०॥

अभिनन्दति रतिपूर्वं, मध्य-प्रदेशस्य मन्त्रिणं मुख्यम्।
श्रीवृन्दावनवासी, शास्त्री, वनमालिदासाख्यः ॥११॥

श्रीस्वामि-गङ्गेश्वरानन्दाऽभिनन्दनम् ।

निर्माणकाल : वि० सं० २०३७

स जयति श्रौतमुनीति, विख्यातःस्वाश्रमो जगति ।
यस्य प्राङ्गणमध्ये, नृत्यति श्रौतःसुसिद्धान्तः ॥१॥

गङ्गेश्वरानन्दमहोदया इमे, वेदान्त-सिद्धान्त-नितान्त-पारगाः ।
एषां सुसौजन्य-बलेन शोभते, श्रीवेदमूर्तेरधिका प्रतिष्ठा ॥२॥

एषां समक्षे किमु वक्तुमीशो, भवामि चात्यन्त-सुमन्दबुद्धिः ।
तथापि सौशील्यमहो अमीषां, वक्तुं मुदा मां मुखरीकरोति ॥३॥

सप्ताग्नि-नन्द-विधु-सम्मितविक्रमाब्दे, स्वानन्दपूर्ण इव योऽवततार भूमौ ।
धर्मं सनातनमथाऽवति सर्वकालं, गङ्गेश्वरःस जयताद् विदितो महात्मा ॥४॥

वेदान्तवेद्य इव यः खलु वेदवेत्ता, श्रौतं मुनिं च मनुते तनुतेऽपि लोके ।
वेदं च वेदयति गूढरहस्य-पूर्वं, गङ्गेश्वरः स जयताद् विदितो महात्मा ॥५॥

सप्ताग्नि-नन्द-विधु-सम्मितविक्रमाब्दे, गङ्गेश्वरा गुरुवरा भुवि प्रादुरासन् ।
सप्ताग्नि-शून्य-कर-सम्मितविक्रमाब्दे, पूर्णायुषो निजमहोत्सवमर्चयन्ति ॥६॥

गङ्गेश्वरानन्द-महोदया इमे, पूर्णायुषः पूर्णमहोत्सवेऽस्मिन् ।
लोकोत्तरं दर्शनमर्पयन्तो, विराजमानाः सुखयन्ति सर्वान् ॥७॥

अलंकुर्वन्तः श्रीचरणकमलैर्भारतभूवं
विराजन्तामेते परमपि परं वत्सरशतम् ।
इतीवाऽस्माकं सन्मनसि सततं तर्षशतकं
विलासं संकुर्वन् नट इव मुदा नृत्यतितराम् ॥८॥

अभिनन्दति रतिपूर्वं, श्रीयुत-गङ्गेश्वरानन्दान् ।
श्रीवृन्दावनवासी, शास्त्री वनमालिदासाख्यः ॥९॥

श्रीद्वारकाधीशमहाकाव्ये शुभसम्मितिः

निर्माणकालः वि० सं० २०३७

श्रीकृष्णो वासुदेवः स जयति निररां डाक्टरोपाधियुक्तः
सप्ताचार्याख्यया च प्रथितशुभयशा भारते भारतेस्मिन् ।

सौजन्यं यस्य दृष्ट्वा प्रमदमुपययौ भूरि चेतो मदीयं
काव्यं येन प्रणीतं तदपि विजयते द्वारकाधीशसंज्ञम् ॥१॥

श्रीवासुदेवकृष्णः, कृतवान् यदिदं महाकाव्यम् ।
तेनाऽस्यापि सुगणनं, स्यादेव द्राङ् महाकविषु ॥२॥

श्रीद्वारकाधीश-नवीन–काव्ये, बहूनि वृत्तानि पुरातनानि ।
दोहादि-वृत्तानि नवानि चात्र, शोभामनल्पां प्रतिपादयन्ति ॥३॥

काव्येऽस्मिन् रमणीये, भवन्ति यानि महाकाव्यचिन्हानि ।
विलसन्ति तानि समानि, तेनेदं भो ! महाकाव्यम् ॥४॥

श्रीवासुदेवस्य सुशोभना कृतिः, कृती जनो यां सकलः प्रशंसति ।
सैषा सदा मोदवहा मनस्विनां, मनःसु भूयाद् हरिभक्तिमिच्छताम् ॥५॥

इति ममाऽप्यनुभूय विलिख्यते, कृतिरियं न मुधैत्र प्रशस्यते ।
इति विचार्य विचारचणा जना, अपि पठन्तु सुकृष्ण-सुभाषितम् ॥६॥

श्रीद्वारकाधीश्वर-काब्यमेतद्, विलोकयामास समं समन्तात् ।
संशोधयामास च सर्वमेव, महाकविः श्रीवनमालिदासः ॥७॥

वैराग्य-मतिण्ड-ग्रन्थे शुभसम्मतिः वि० सं० २०३७

वैराग्य-मार्तण्डमहो विना नो, नश्येदिहाऽज्ञान-महान्धकारः ।
अतो जनैराश्रयणं विधेयं, वैराग्य-मार्तण्ड-महोदयस्य ॥१॥

यास्यन्ति दूरं सकला निशाटा, विज्ञान-सद्भक्ति-सुभक्षिका याः ।
दारैषणा चैत्र धनैषणा च, लोकैषणा इत्यभिधा-प्रसिद्धाः ॥२॥

वैराग्य-मार्तण्डमिमं विलोक्य, सद्भक्त-हृत्कञ्जमतिप्रसन्नम् ।
भविष्यतीतीरयतीह सत्यं, महाकविः श्रीवनमालिदासः ॥३॥

आत्मानन्देन महता, स्वात्मानन्द-प्रकाशकः ।
आत्मानन्दाय वैराग्य-मार्तण्डोऽयं निषेव्यताम् ॥४॥

संग्रहः शिष्टवाक्यानामात्मानन्देन साधुना ।
कृतो वैराग्य-मार्तण्डे सम्यक् सर्वैर्विलोक्यताम् ॥५॥

स्वतन्त्रानन्द-सत्कीर्ति-रात्मानन्देन साधुना ।
शिष्येणैव कृता कीर्ति-र्गुरोरेवं विराजते ॥६॥

श्रीओंकारानन्द ब्रह्मचारिणः प्रबन्धक-पदसमारोहण-समये

दीयमानमभिनन्दन-पत्रम्

निर्माणकाल :—वि० सं० २०३८ श्रीरामनवमी

समागता ये मथुरापुरीतो, वृन्दावनाद् ये च महानुभावाः ।
ये वाऽन्यतश्चैव समागताः स्युः, सुस्वागतं सर्वजनस्य कुर्वे ।।
या मातरश्चैव तथा भगिन्य-, स्तासामपि स्वागतमेव कुर्वे ।।१।।
आनन्दवृन्दावनके सुवेशे, वृन्दावनस्यैव शुभप्रदेशे ।
मुक्तासरः सीम्नि विराजमाने, मानेन हीनेऽपि सुशोभमाने ।।२।।
श्रीभावभावेश्वर-मन्दिरं च, श्रीनृत्यगोपाल-सुमन्दिरं च ।
विराजते भाव-विभाव-युक्तं, सुशोभते सांस्कृतिकं च केन्द्रम् ।।३।।

आनन्द-वेदविद्यायाः केन्द्रं तन्द्रा-विवर्जितम् ।
अर्चितं धूपदीपाद्यैः पुण्यशालिभिरर्जितम् ।।४।।

गोशाला पाठशाला हवनविधिकृते होत्रशाला विशाला
अन्नक्षेत्रं च नित्यं चलति सुचलनं यत् सतां सेवनाय ।
पुष्पाणां वाटिका च हरि-हरपदयोः सेवनाय प्रफुल्ला
सेवा-कार्ये प्रवृत्ता अपि सहजतया सर्वं एव प्रसन्नाः ।।५।।

विचित्र आनन्दकुटीर आस्ते, यस्मिन् महान्तो निवसन्ति विज्ञाः ।
यत्रौषधस्यापि महान् प्रबन्धो, विराजते रोगनिवारणाय ।।६।।
सुपुस्तकानां भवनं विचित्रं, सुभक्ति-विज्ञान-विवर्धनाय ।
नवीनवृत्तान्त-विबोधकानां, पत्रादिकानामपि वाचनाय ।।७।।

अखण्डानन्दपूर्णो मेऽखण्डानन्दसरस्वती ।
विराजतेतरां यस्य वाचि नित्यं सरस्वती ।।८।।

यस्याऽऽचार-विचार-धारणपरा वाणी सदा निर्मला
भक्ति-ज्ञान-विराग-साधकतमा भावानुसारं नृणाम् ।
सोऽयं सम्प्रति सर्वसौख्यजनको दीनेषु यो वत्सलोऽ-
खण्डानन्दसरस्वती विजयतामानन्दवृन्दावने ।।९।।

यदीयं सौजन्यं सुखयतितरां सर्व-जनतां
यदीयं चारित्र्यं जनयतितरां सर्व-समताम् ।
यदीयं गाम्भीर्यं कलयतितरामम्बुधितुलां
अखण्डानन्दः सोऽर्पयतु कृपया प्रेमकणिकाम् ॥१०॥

ओंकारानन्दनामा स सयति नितरां ब्रह्मचारी विनम्रः
सौजन्यं यस्य दृष्ट्वा प्रमदमुपययौ भूरि चेतो मदीयम् ।
यस्येवाऽयं प्रकृत्या सहजमधुरया जायते सत्प्रबन्धः
सर्वाऽऽनन्द-प्रदायी पुनरपि भविताऽऽनन्दवृन्दावनस्य ॥११॥

अभिनन्दति रतिपूर्वं सर्वानत्राऽऽगतान् सुजनान् ।
श्रीवृन्दावन-वासी, शास्त्री वनमालिदासाख्यः ॥१२॥

कादम्बरीकथा-सारांशः

लेखन—समयः वि० सं० २०३७ माघकृष्णा द्वितीया

लेखकः—भारतसरकारद्वारा कालिदास-पुरस्कारेण पुरस्कृतः श्रीकृष्णानन्द-महाकाव्यादिअनेककाव्यकर्ता—कहाकविः श्रीवनमालिदासशास्त्री श्रीवृन्दावनवास्तव्यः ।

कादम्बरी न केवलं वाणस्य अपि तु समस्तस्यैव संस्कृतसाहित्यस्य सर्वोत्कृष्टं गद्य-काव्यम् । अस्याः कथा कवि-कल्पिता । वाणेनेयं कथारूपेण कथिता । अस्या भागद्वयम् पूर्वोत्तर–भागनाम्ना प्रसिद्धम् । वाणेन तु पूर्व-भागस्यैव रचना कृता । ततस्तस्मिन् दिवं याते सति, उत्तरभागस्य रचना तु पुलिन्दभट्टनाम्ना भूषणभट्टनाम्ना वा तत्पुत्रेण कृता इति प्रसिद्धिः ।

कादम्बरी-प्रारम्भे तु कविना विंशतिसंख्येषु श्लोकेषु देवस्तुतिः गुरुदेववन्दना, खलनिन्दा, सज्जनप्रशंसा, निजवंशपरम्परा च वर्णिता । ततः कादम्बरीकथाया भूमिकारूपं कथामुखं प्रस्तुम् ।

कथामुखे परमप्रतापिनो राज्ञः शूद्रकस्याऽपूर्वं वर्णनं वर्तते, यस्य राज-धान्या नाम 'विदिशा' इति । एकदा एका चाण्डालकन्या पञ्जरे स्थितं वैशम्पायननामकं शुकमादाय शूद्रकस्य सभायामाजगाम । पञ्जरस्थःशुको

राज्ञः प्रशंसायां परमसुन्दरं आर्याछन्दः पपाठ। शुकस्य पाण्डित्येन प्रभावितो राजा निजपूर्वजन्मकथां श्रावयितुं शुकमाजग्राह।

ततो वैशम्पायन-नामा शुकः स्वकथामेवं प्रकारेण वर्णयामास—

अहं विन्ध्याटवीमध्ये वर्तमानस्य पम्पाभिधानस्य सरोवरस्य पश्चिमे तटे स्थितस्य शाल्मलीवृक्षस्योपरि निजपित्रा सह निवासमकरवम्। ममोत्पत्यनन्तरमेव मम माता मृता। एकदा एका शबर-सेना मृगयां कर्तुं तत्राऽऽजगाम। तत्सेनात एको वृद्धः शबरः पश्चादवशिष्टः। तेन च तस्मिन् शाल्मलीवृक्षे आरुह्य वृद्धस्य मम पितुः कण्ठं मोटयित्वा स नीचैः पातितः। तस्य पक्षेषु सम्पुटितोऽहमपि प्रापतं किन्तु सुष्कपर्णसमूहोपरि पतनाद् हेतोरङ्गानि ममः न त्रुटितानि। तमालवृक्षस्य मूले निलीनः सन् शबरस्य दृष्टेरप्युर्वरितः।

शबरे प्रयाते सति मां पिपासा बाधतेस्म। तदैव दैवयोगेन जावालिऋषिकुमारः स्नातुं पम्पामाजगाम। स मां जलं पाययित्वा स्वपितुराश्रममानयत्। तत्र जाबालिमहर्षिर्हसित्वा मामुवाच—शुक एष निजकर्मणामेव फलं भुंक्ते। तच्छ्रुत्वा ऋषीणां हृदि महत्कुतूहलमभूत्। त्रिकालज्ञेन महर्षिणा जाबालिना अन्यऋषीणामुत्सुकताशान्त्यर्थं शुकस्य तस्य पूर्वजन्मकथां श्रावयितुं वचोदत्तम्। कथामुखभागस्यात्र समाप्तिः।

जाबालिःशुकस्य पूर्वजन्मकथामेवं श्रावयति स्म—

उज्जयिनी-पुर्यां तारापीडनामा राजा बभूव। तस्य शुकनासनामा मन्त्री च। सन्ततेरभावेन राज्ञः पत्नी विलासवती विशेषदुःखिताऽऽसीत्। सा देवाराधनं चकार। ततो राज्ञा स्वप्ने विलासवतीमुखे प्रविशन् चन्द्रो दृष्टः। राज्ञा मन्त्रिणं प्रति स्वस्वप्नः श्रावितः। मन्त्रिणाऽपि स्वस्वप्नः कथितो यन्मया निजपत्न्या मनोरमाया क्रोडे केनचिद् दिव्यपुरुषेण निहितं पुण्डरीकमेकं दृष्टमिति। कियत्समयानन्तरं बिलासवत्या मनोरमया च पुत्रः समुदपादि। राजकुमारस्य नाम 'चन्द्रापीड' इति मन्त्रिपुत्रस्य च 'वैशम्पायन' इति नाम धृतम्।

चन्द्रापीड-वैशम्पायनयोः शैशवत एव गाढा मैत्री बभूव। अतः पठनार्थं द्वावपि सहैव विद्यालयं प्रेषितौ। तत्र ताभ्यां सर्वा अपि विद्या

अल्पीयसैव कालेनाऽधीता:। अध्ययनाऽनन्तरं द्वावप्याहूतौ विद्यालयात्, राज्ञा च राजकुमाराय 'इन्द्रायुधनामा' घोटक: पुरस्काररूपेणारोहणार्थं प्रेषित:।

नगर्यामागमनानन्तरं राज्ञ्या विलासवत्या 'पत्रलेखा'–नाम्नी कन्या सेवार्थं चन्द्रापीड–सविधे प्रहिता; चन्द्रापीडश्चैनां ताम्बूलकरंक–वाहनार्थं निजपार्श्वे रक्षतु इति अनुरुद्ध:। पत्रलेखा तु कुलूतराजस्य पुत्री आसीत्, या हि तद्राजधानीं पराजित्य आनीता।

राजा तारापीडो यदा चन्द्रापीडं युवराजं कर्तुमैच्छत्, तदा शुकनासो मन्त्री तं सारगर्भितेनैकेन उपदेशेन यौवन-सुलभान् दोषान् राजमदेनोत्पद्य-मानदुष्परिणामांश्च विज्ञापयामास। युवराजपदाधिकारानन्तरं चन्द्रापीड इन्द्रायुधनामके घोटके आरुह्य वैशम्पायनेन सार्धं बृहतीमेकां सेनामादाय दिग्विजयाय नि:ससार। दिग्विजयान्तरं चन्द्रापीड एकस्मिन् दिने एकल एव आखेटार्थं विनिर्गत: किन्नरयुगलमनुसरन् बहुदूरं आययौ, पिपासाऽपन-यनार्थं जलं गवेषयन् 'अच्छोद' नामक-सरसस्तीरमाजगाम। तत्र तस्य-शून्ये शिवमन्दिरे पूजां कुर्वाणया परमसुन्दर्या कन्यया सह सम्मेलनमजनि। चन्द्रा-पीडस्याऽनुरोधेन तया स्वात्मकथा श्राविता।

तया प्रोक्तं अहमस्मि महाश्वेतानामधेया हंसनाम्नो गन्धर्वस्यगौरी-नामिकाया अप्सरस:पुत्री। मया पुण्डरीकनामा कश्चन ऋषिकुमार आलो-कितस्तेन चाऽहं दृष्टा, द्वावप्यावां परस्परं प्रेमानुरक्तावभूव। पुण्डरीको महर्षे:श्वेतकेतो: पुत्र आसीत्। अहं तु स्नात्वैव निजगृहं प्रति परावृत्ता। पश्चात् पुण्डरीकस्य विरहावस्थां तत्सहचरात् कपिंजलकात् श्रुत्वा अहं तेन मिलितुं गता किन्तु मद्गमनात् पूर्वमेव पुण्डरीक: परलोकं प्रस्थित:। ततोऽहं यदा सहसा सतीभवितुं प्रवृत्ता तदैव दिव्य एक: पुरुष आकाशा-दवतीर्य मह्यमास्वासनमेतददात् यत् तव प्रियेण तव पुन: समागमोऽवश्यं भविता, पुण्डरीकस्य मृतं शरीरमाहाय आकाशमुदपतत्। तत्सहचर: कपिं-जलोऽपि तं दिव्यपुरुषं विरुद्धं ब्रुवन् तमेवाऽनुगच्छतिस्म। अहं तु तत आरभ्य निजप्रियतमसमागमंप्रतीक्षमाणा निजसख्या 'तरलिकया' सहात्रैव अच्छो-दसरस्तीरे निवसामि। महाश्वेताया आत्मकथाऽत्रैव समाप्ता भवति।

तत्र तरलिकामदृष्ट्वा चन्द्रापीडो महाश्वेतां पृच्छतिस्म, त्वां विहायाऽधुना क्व गता सा तव नित्यसहचरी 'तरलिका'? ततो महाश्वेतया प्रसंगवशतो निजसख्या: कादम्बर्या विषये स राजकुमार: (चन्द्रापीड:) प्रबोधित:। महाश्वेतया प्रोक्तं 'कादम्बरी' मम प्रियसखी वर्तते। तस्या मातुर्नाम 'मदिरा' इति पितुश्च नाम 'चित्ररथ' इति। कादम्बर्या एक:शपथ: कृतोऽस्ति,यदहं मम प्रियसख्या महाश्वेताया निजपतिना मिलनं न भविष्यति तावत्पर्यन्तं निजविवाह् न करिष्यामीति। एतत् सम्बन्धे निजसन्देशं ग्राहयित्वा सा तरलिका मया तत्सविधे प्रेषिता।

द्वितीयदिवसे सा तरलिका, कादम्बरी–वीणावाहकेन नाम्ना केयूरकेण सहागत्य सूचयतिस्म, सा कादम्बरी तु निजपूर्वनिश्चये दृढहठा, इति। ततो महाश्वेता स्वयमेव तां बोधयितुं चलति, महाश्वेताया आग्रहेण चन्द्रापीडोऽपितया सहैव चलतिस्म। चन्द्रापीडो कादम्बरी-प्रथमदर्शन एव परस्परं प्रेमकरोतिस्म। किन्तु तदानीमेव पितु:पत्रप्राप्ति-कारणात् चन्द्रापीडस्य उज्जयितीं प्रति परावर्तनं भवति। निजताम्बूल-करंकवाहिनीं चित्रलेखां तु कादम्बरीनिकट एव स्थापयित्वा वैशम्पायनं च सेनया सह परावर्तनमादिश्य स्वयं त्वरया राजधानीं प्रति प्रतस्थे। राजकुमारागमने सर्वेऽपि प्रसन्ना बभूवु:। कतिपयदिनान्ते पत्रलेखाप्यागत्य कादम्बरी-विरहावस्थां राजकुमाराग्रे वर्णयामास। कादम्बरी-पूर्वभागस्य कथात्रै व समाप्ता भवति।

उत्तर-कादम्बरी-प्रारम्भे पद्यै:प्रस्तावना वर्तते, पश्चात् कथा प्रारभ्यते। चन्द्रापीड: कादम्बरीनिकटत आगतात् केयूरकात् कादम्बरी-विरहावस्थां श्रुत्वा तां मिलितुं व्यग्रो भवति। तदैव च वैशम्पायनविषये सूचना मिलति यन्नजाने तस्य हृदि किं जातं यत आग्रहे कृतेऽपि अच्छोदसरोवरप्रदेशतो न परावृत्त:।

चन्द्रापीडो वैशम्पायनेन मिलितुं अच्छोद-सरोवरं प्रस्थितो भवति। तत्र वैशम्पायनो न मिलतिस्म। महाश्वेतात एव तद्विषये ज्ञातं भवति यद् वैशम्पायनस्तत्र आगत्य पूर्वपरिचित इव महाश्वेतात: प्रणयं याचते, परन्तु पुण्डरीकं प्रति अनन्यप्रेमयुक्तया महाश्वेतया स: 'शुकोभव' इतिशप्त:। मित्रस्य मृत्युं श्रुत्वैव चन्द्रापीडस्य हृदयं विदीर्णं भवति। कादम्बरी च

निजप्रियतमं मृतं दृष्ट्वा स्वयमपि मर्तुं मिच्छति, किन्तु तदैव आकाशवाणी भवतिस्म यत्–पुण्डरीकस्य शरीरं तु चन्द्रलोके सुरक्षिततं वर्तते, कादम्बर्या अपि स्वप्रियेण पुनः समागमोऽवश्यं भविता, तया तु चन्द्रापीडशरीरस्य रक्षा विधातव्या। पत्रलेखा च इन्द्रायुधनामकेन घोटकेन सह सहसाऽच्छोद-सरोवरे पतितस्म। तदैव तत्सरोवरात् कपिंजलःप्रकटो भवति।

अधुना कपिंजलः कथां प्रारभते—कपिंजलः पुण्डरीकस्य मृतशरीर-मादाय-उड्डीय गच्छतो दिव्यपुरुषस्य पृष्ठतोऽनुजगाम। दिव्यपुरुष सः चन्द्र एवाऽऽसीत्। मरणसमये पुण्डरीकश्चन्द्रमेवं शशाप—"त्वयाऽपि मत्तुल्या एव प्रियवियोगपीडाऽनुभवनीया भविष्यति" इति। प्रत्यपकारे चन्द्रेणापि पुण्डरीक एवं शप्तो यत् त्वमपि मत्समान एव दुःखभागी भविष्यतीति। चन्द्रमसः शापसमाप्तिपर्यन्तं पुण्डरीकस्य शरीरं सुरक्षणार्थं चन्द्रलोकं प्रापितमासीत्। एताः सूचना आदाय परावर्तमानेन कपिंजलेन एकस्य विमानचारिणो मार्ग उल्लंघितः, तत्कारणादेव वैमानिकेन स 'घोटको भवेति' शप्तः। अवकाशश्चैष दत्तो यत् स्वस्वामिनो मरणान्ते जले स्नाते सति शापान्मुक्तो भविष्यसीति। एतावदुक्त्वा कपिंजलः सर्वा घटना निज-पितरं महर्षि श्वेतकेतुं श्रावयितुं आकाशमार्गेण प्रस्थितः।

महर्षिजावालिरपि एतावदुक्त्वा निजकथां समापयन् कथयति—प्रथमं तु शुक एष कामासक्तिकारणात् शुकनास-पुत्र-वैशम्पायनस्य रूपेण प्रादुर्बभूव पश्चादपि निजभ्रष्टताकारणात् शुको बभूव। अधुना शुकोऽपि निजकथासूत्र-मग्रे वर्धयति—सम्प्रति पूर्वजन्मवार्ता मम स्मृतिपथमारूढाः सन्ति, मया 'चन्द्रापीडः क्वाऽधुना वर्तत'—इति पृष्टो जावालिराह—'यदा त्वं उड्डयनयोग्यो भविष्यसि तदा प्रष्टव्यमिति" तदानीमेव मत्पित्रा महर्षिणा श्वेतकेतुना कपिंजलद्वारा समाचार एष प्रेषितो—यत्त्वया शापान्तं यावत् जावालेराश्रम एव स्थातव्यम्" इति किन्तु कतिपय-दिनानन्तरं मम पक्षेषु दृढेषु जातेषु-अहं निजप्रेमिकया महाश्वेतया मिलितुमाकाशमुत्पतितः, मार्गे चाण्डालस्य हस्ते पतितः। चाण्डालेन चाहं निजकन्यायै दत्तः सा चैषा कतिपयदिनानि तत्र रक्षित्वा मामत्र आनीतवतीति। शुकद्वारा शूद्रकं प्रति कथिता कथात्र समाप्ता भवति।

श्रीमद्भागवतके 'कृष्णस्तु भगवान् स्वयम्' पर तात्त्विक विमर्श

(लेखक—महाकवि श्रीवनमालिदास शास्त्रीजी महाराज)

श्रीमद्भागवत प्रथम स्कन्धके तृतीय अध्याय में सभी अवतारों का सूत्ररूपसे वर्णन किया गया है। पश्चात् श्रीकृष्णको ही परिपूर्णतम एवं सर्वावतारी अर्थात् सभी अवतारोंका मूलतत्त्व बताते हुए अट्ठाईसवें श्लोकमें यह वाक्य आया है कि **'एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्'** (श्रीमद्भा० १। ३। २८) अर्थात् ये सब अवतार तो भगवान् के अंशावतार अथवा कलावतार हैं, परंतु भगवान् श्रीकृष्ण तो स्वयं भगवान् (अवतारी) ही हैं। श्रीकृष्ण ही सब अवतारोंके मूलतत्त्व हैं।

श्रीव्यास आदि मुनियोंने अंशांश, अंश, आवेश, कला, पूर्ण और परिपूर्णतम—ये छः प्रकारके अवतार बताये हैं। इनमें से छठा—परिपूर्णतम अवतार तो साक्षात् भगवान् श्रीकृष्ण ही हैं। मरीचि आदि 'अंशांशावतार', ब्रह्मा आदि 'अंशावतार', परशुराम आदि 'आवेशावतार' और कपिल एवं कूर्म आदि 'कलावतार' कहे गये हैं। नृसिंह, राम, श्वेतद्वीपाधिपति हरि, वैकुण्ठ, यज्ञ और नर-नारायण पूर्णावतार हैं, अर्थात् सर्वावतारी हैं। असंख्य ब्रह्माण्डोंके अधिपति वे प्रभु श्रीगोलोकधाममें विराजते हैं जिनके अपने तेजमें सभी अवतारोंके तेज विलीन हो जाते हैं। भगवान्के उस अवतारको श्रेष्ठ विद्वान् पुरुष साक्षात् 'परिपूर्णतम' बताते हैं।

भगवान् श्रीकृष्णकी स्वयं भगवत्ताको ज्ञानी भक्तोंमें श्रेष्ठ श्रीउद्धवजी ज्ञानियोंमें श्रेष्ठ भक्तवर्य श्रीविदुरके प्रति इस प्रकार बताते हैं—

स्वयं त्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याप्तसमस्तकामः।
बलिं हरद्भिश्चिरलोकपालैः किरीटकोटयेडितपादपीठः॥

(श्रीमद्भा० ३। २। २१)

'देखो विदुरजी! स्वयं भगवान् श्रीकृष्ण तीनों लोकोंके अथवा वैकुण्ठलोकके ऊपर विराजमान अपने नित्यधाम-गोलोक, मथुरा, द्वारकारूप तीनों लोकोंके और ब्रह्मा, विष्णु, महेश इन तीनोंके अधीश्वर हैं। अतः

जब उनके समान ही कोई नहीं है तब उनसे बढ़कर भी कोई कैसे हो सकता है। वे अपने स्वत:सिद्ध ऐश्वर्यसे, किंवा स्वरूपभूत परमानन्द शक्तिके प्रभावसे हो सर्वदा पूर्णकाम हैं और चिरकालजीवी ब्रह्मा आदि असंख्य लोकपालगण अनेक प्रकारकी भेंटें देकर अपने-अपने मुकटोंके अग्रभागसे उनके चरण रखने की चौकी को प्रणाम किया करते हैं।

इस श्लोकको विशिष्ट व्याख्या करते हुए श्रीरूपगोस्वामीजीने अपने 'लघुभागवतामृत' में एक पौराणिकी प्रक्रिया दिखाकर यह कहा कि भगवान् श्रीकृष्णकी अचिन्त्यशक्तिमें अनेक प्रकारके अनन्त ब्रह्माण्ड विचित्र-रूपसे विराजमान हैं। इस ब्रह्माण्डका परिमाण तो केवल पचास करोड़ योजन ही बताया है, किंतु श्रीकृष्णकी विचित्रताके कारण कितने ही ब्रह्माण्ड सौ करोड़ योजनके हैं, कितने ही अरब-खरब योजनके तथा कितने ही सौ-सौ परार्द्धके परिमाणके विस्तारवाले हैं। यह ब्रह्माण्ड तो केवल चौदह भुवनोंवाला है, किन्तु अन्य ब्रह्माण्डोंमें तो किसीमें बीस भुवन हैं और किसीमें पचास, किसीमें सत्तर, किसीमें सौ, किसीमें हजार, किसीमें दस हजार तथा किसीमें लाख भुवन भी हैं। उन सभी ब्रह्माण्डोंमें ब्रह्मादि लोकपालगण भी अनेक प्रकार से विराजमान हैं। किसी-किसी ब्रह्माण्ड में इन्द्र आदि लोकपाल शतमहाकल्पजीवी हैं और ब्रह्मादि लोकपालगण परार्द्ध महाकल्पजीवी हैं। इस प्रकार वे ब्रह्मादि, इन्द्र आदि लोकपालगण ही 'चिरलोकपाल' कहे जाते हैं। उनके कोटि-कोटि मुकुटोंके द्वारा श्रीकृष्ण के पादपीठ की स्तुति यथावसर हुआ करती है।

उसका विवरण इस प्रकार है कि एक समय भगवान् 'श्रीकृष्ण द्वारकापुरीमें विराजमान थे। उसी समय द्वारपाल ने आकर निवेदन किया कि 'प्रभो! आपके श्रीचरणारविन्दों के दर्शन की अभिलाषा से ब्रह्माजी द्वारपर खड़े हैं।' 'उनसे पूछो कि कौनसे ब्रह्मा द्वारपर आये हैं'–भगवान्के इस वचन को सुनते ही द्वारपालने द्वारपर जाकर ब्रह्माजोसे पूछकर कहा कि 'प्रभो! सनकादिकोंके पिता चार मुखवाले ब्रह्मा हैं।' 'ले आओ'—श्रीकृष्णका यह वचन सुनकर द्वारपाल ब्रह्माको सभामें ले आया। ब्रह्माके दण्डवत्-प्रणाम

कर लेनेपर श्रीकृष्ण ने पूछा कि 'ब्रह्मन् ! आप आज किस कारण से आये हैं ?' ब्रह्मा बोले—'प्रभो ! आने का कारण तो पीछे निवेदन करूँगा, परन्तु नाथ ! आपने अभी जो प्रश्न किया कि 'कौन से ब्रह्मा आये हैं' बस पहले इसी रहस्य को जानना चाहता हूँ । कारण यह है कि मेरे अतिरिक्त कोई ब्रह्मा नहीं हैं ।'

तदनन्तर भगवान् श्रीकृष्णने कुछ मुस्कराकर सभी चिरलोकपालोंका स्मरण किया। तत्काल कोटि-कोटि ब्रह्माण्डोंसे लोकपालगण तीव्रवेग से द्वारका में आने लगे। उनमें आठ मुखवाले, सोलह मुखवाले, बत्तीस मुखवाले, चौसठ मुखवाले, सौ, हजार, लाख तथा करोड़ मुखवाले ब्रह्मा भी थे, और बीस, पचास, सौ हजार मुखवाले तथा लाख भुजावाले, लाख-लाख शिरोंवाले शंकर भी थे तथा लाख एवं दस लाख तक के नेत्रोंवाले इन्द्रगण थे। सभी अनेक आकारवाले एवं सभी अनेक प्रकारके आभूषण धारण किये हुए थे। सभी चिरलोकपालगण, स्वयं भगवान् श्रीकृष्ण के पादपीठ में प्रणत हो गये। उन सबको देखकर चार मुखवाले ब्रह्मा विस्मित होकर उन्मत्त हो गये।

ब्रह्मसंहिता में श्रीकृष्ण की स्वयं भगवत्ता इस प्रकार दिखायी है—

यस्यैकनिःश्वसितकालमथावलम्ब्य जीवन्ति लोमबिलजा जगदण्डनाथाः।
विष्णुर्महान् स इह यस्य कलाविशेषो, गोविन्दमादिपुरुषं तमहं भजामि ।।

प्रार्थना करते हुए ब्रह्मा कहते हैं कि 'मैं आदिपुरुष उन श्रीगोविन्दका भजन करता हूँ, जिन गोविन्दके अभिन्न-स्वरूप महाविष्णुके एक श्वासके लेनेका समय अवलम्बन करके, जिनके (महाविष्णुके) रोमकूपोंमें विद्यमान अनन्त ब्राह्मण्डाधिपति जीवित बने रहते हैं, वे महाविष्णु भी जिन गोविन्द के कलाविशेष कहे जाते हैं।'

रामादिमूर्तिषु कला नियमेन तिष्ठन्, नानावतारमकरोद् भुवनेषु किन्तु ।
कृष्णः स्वयं समभवत् परमःपुमान् यो, गोविन्दमादिपुरुषं तमहं भजामि ।।

'मैं, आदिपुरुष उन गोविन्द का भजन करता हूं जो श्रीकृष्ण-नामक परमपुरुष, अपनी कलाओं के नियम से अर्थात् शक्तियों के परिमित प्रकाशके द्वारा श्रीराम आदि मूर्तियों में स्थित होकर, भुवनोंमें अनेक अवतार धारण

करते रहते हैं; और वैवस्वत मन्वन्तर के इस अट्ठाईसवें द्वापर के अन्त में तो स्वयं भगवान् श्रीकृष्ण ही परिपूर्णतमरूपसे प्रकट हुए हैं', प्रमाण यथा—

मत्स्याश्वकच्छपनृसिंहवराहहंस-राजन्यविप्रविबुधेषु कृतावतारः ।
त्वं पासि नस्त्रिभुवनं च यथाधुनेश ?, भारं भुवो हर यदूत्तम ? वन्दनं ते ।।

(श्रीमद्भा० १०।२।४०)

भगवान् शंकर के अवतार श्रीशंकराचार्यजी ने भगवान् श्रीकृष्ण की स्वयं भगवत्ता अपनी निराली परिपाटी से इस प्रकार प्रतिपादित की है—

ब्रह्माण्डानि बहूनि पङ्कजभवान् प्रत्यण्डमत्यद्भुतान्
गोपान् वत्सयुतानदर्शयदजं विष्णूनशेषांश्च यः ।
शम्भुर्यच्चरेणोदकं स्वशिरसा धत्ते स मूर्तित्रयात्
कृष्णो वै पृथगस्ति कोऽप्यविकृतःसच्चिन्मयोनीलिमा ।।

(प्रबोधसुधाकर—२४२)

जिन श्रीकृष्ण ने ब्रह्ममोहन-लीला में ब्रह्मा को अनेक ब्रह्माण्डों का दर्शन कराया एवं प्रत्येक ब्रह्माण्ड में अतिशय अद्भुत ब्रह्माओं का दर्शन कराया तथा सभी वत्सगणों से युक्त ग्वाल-बालों को भी विष्णुरूप से प्रदर्शित कर दिया और शंकर भी जिनके चरणोदकरूप गङ्गाजल को अपने सिरपर सादर धारण करते हैं, किन्तु सच्चिदानन्दमयी श्यामसुन्दरता की झाँकी वाले वे ही अनिर्वचनीय स्वयं भगवान् श्रीकृष्ण ब्रह्मा, विष्णु महेशरूप तीनों मूर्तियों से पृथक् ही निर्विकाररूप से विराजमान हैं । तात्पर्य, श्रीकृष्ण दूसरे किसी की अपेक्षा नहीं करते हैं । **'अनन्यापेक्षि यद्रूपं स्वयंरूपः स उच्यते'**; क्योंकि जिसका रूप दूसरे की अपेक्षा नहीं करता, वही स्वयं भगवान् कहलाता है । श्रीकृष्ण की परावस्था का प्रदर्शन करते हुए श्रीकृष्ण-कर्णामृतकार श्रीबिल्वमङ्गलजी ने भी कहा है कि—

सन्त्ववतारा बहवः, पुष्करनाभस्य सर्वतोभद्राः ।
कृष्णादन्यः को वा, लतास्वपि प्रेमदो भवति ।।

'पद्मनाभ भगवान् के सर्वतोभाव से मङ्गलमय बहुत-से अवतार हैं तो उन्हें रहने दो । परन्तु श्रीकृष्ण से भिन्न ऐसा कौन-सा अवतार हुआ है कि जो लताओं को भी प्रेम का प्रदान करने वाला है ?' यद्यपि—'अपि

ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्' उत्तररामचरित की इस उक्ति के अनुसार, सीता-विरहाकुल श्रीरामजी की दशा को देखकर पत्थर भी रोते थे एवं वज्र का हृदय भी पिघल जाता था, तथापि वह तो उनके वियोग की दशा में हुआ था। किन्तु श्रीकृष्ण की तो यह विशेषता थी कि उनके संयोग में भी गोपगण, पक्षिगण एवं मृगगण भी रोमाञ्चित होते रहते थे; यथा—

'त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं, यद्गोद्विजद्रुममृगाः पुलकान्यबिभ्रन्।'
(श्रीमद्भा० १०।२९।४०)

'प्रणतभारविटपा मधुधाराः, प्रेमहृष्टतनवः ससृजुः स्म।'
(श्रीमद् भा० १०।३५।९)

निजनिर्मित—षट्सन्दर्भरूप मन्दराचल के द्वारा श्रीमद्भागवतरूप क्षीरसागर का मन्थन करके, श्रीकृष्णचन्द्र-रूप परिपूर्णतम चन्द्रमा को हस्तामलकवत् दिखाकर प्रेमी भक्तों के जीवनरूप श्रीजीवगोस्वामीजी ने 'तत्त्वसंदर्भ' के आदि में 'मितं च सारं च वचो हि वाग्मिता' के अनुसार साररूप से श्रीकृष्ण की स्वयं भगवत्ता प्रदर्शित करते हुए इस प्रकार प्रार्थना की है कि—

यस्य ब्रह्मेति संज्ञां क्वचिदपि निगमे याति चिन्मात्रसत्ताऽ-
प्यंशो यस्यांशकैः स्वैर्विभवति वशयन्नेव मायां पुमांश्च।
एकं यस्यैव रूपं विलसति परमे व्योम्नि नारायणाख्यं
स श्रीकृष्णो विधत्तां स्वयमिह भगवान् प्रेम तत्पादभाजाम्॥

'परात्परतत्त्वस्वरूप जिन श्रीकृष्ण की चित्स्वरूपा सत्ता अर्थात् श्री-अङ्ग की कान्ति ही 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादि वेद-विभाग में निर्विशेष ब्रह्म का नाम धारण कर लेती है, एवं कारणार्णवशायी सहस्रशीर्षापुरुष, जो कि अपने अंशस्वरूप मत्स्यादि अवतारों के द्वारा माया को वश में करके लीलावतारों को प्रकट करते रहते हैं, वे पुरुष भी जिन श्रीकृष्ण के अंश कहे जाते हैं, एवं जिनका नारायण-नामक एक (मुख्य) रूप, प्रकृति के पार वैकुण्ठ में विराजमान है, वे ही स्वयं भगवान् श्रीकृष्ण इस संसार में अपने चरण-कमल-सेवी भक्तों को अपना प्रेम सदैव अर्पण करते रहें।'

श्रीकृष्ण का साक्षात्कार करनेवाले श्रीमधुसूदन सरस्वतीजी ने तो पूछने वाले अपने अन्तरङ्ग भक्तों से स्पष्ट कह दिया था कि – **'कृष्णात्परं किमपि तत्त्वमहं न जाने'** अर्थात् श्रीकृष्ण से परे और कुछ भी तत्त्व है, इसे मैं नहीं जानता; और कहा कि—

प्रमाणतोऽपि निर्णीतं कृष्णमाहात्म्यमद्भुतम् ।
न शक्नुवन्ति ये सोढुं ते मूढा निरयं गताः ॥

'देखो भाइयो ! मैंने तो श्रीकृष्ण का अद्भुत माहात्म्य प्रमाणों के द्वारा निर्णीत कर दिया है । किन्तु इतने पर भी जो मूढ़ उसको नहीं सह सकते हैं, वे तो निकटवर्ती भविष्य में नरक में ही जाने वाले हैं ।'

शंका-समाधान

१–प्रश्न–यदि भगवान् श्रीकृष्ण ही सर्वावतारी अर्थात् सभी अवतारों के मूलतत्त्व माने जाते हैं तो फिर इनको अवतारों में गणना क्यों ?

उत्तर–उनकी अवतारों में गणना तो भूलोक में विद्यमान अपने गोकुल, वृन्दावन, मथुरा एवं द्वारका आदि धामों में विहार करने के कारण एवं लीलापुरुषोत्तम होने के कारण प्रपञ्च के लोकों में भक्तों पर अधिक करुणा प्रकट करने के कारण तथा आविर्भाव-तिरोभाव के कारण ही हैं । तात्पर्य यह कि ये श्रीकृष्ण स्वयं भगवान् (सर्वावतारी) होकर भी अपने मूलस्वरूप में स्थित रहकर ही अपनी जन्मादि लीलाओं के द्वारा किसी लोकोत्तर माधुर्यको पुष्ट करते हुए निज परिजनवृन्दों के आनन्दविशेष को चमत्कृत करने के लिये कभी-कभी सभी लोगों के दृष्टिगोचर हो जाते हैं । 'प्रकृति के वैभव में अवतीर्ण होना ही अवतार कहा जाता है ।' अतएव गोपालतापिनी उपनिषद् में ब्रह्मा ने गोपालजी से पूछा है कि 'अवतारों के मध्य में आपका अतिशय श्रेष्ठ अवतार कौन होगा, जिससे मनुष्य एवं देवता आदि सभी प्रसन्न हो जायँगे ?' तो उत्तर में कहा–'श्रीकृष्ण ही होंगे ।' अतः अवतारों में भी गणना कर दी ।

२–प्रश्न–यदि श्रीकृष्ण ही परिपूर्णतम माने जाते हैं तो श्रीमद्भागवत के दशम स्कन्ध में **तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शं स नः**(श्रीमद्भा० १०।१।२), **अथाहमंशभागेन देवक्याः पुत्रतां शुभे ?**। (श्रीमद्भा० १०।२।६)

दिष्टचाम्ब ते कुक्षिगतः परः पुमानंशेन साक्षाद् भगवान् भवाय नः (श्रीमद्भा० १०।२।४१) इत्यादि स्थलोंपर श्रीकृष्ण को अंशावतार कहा है, इसका क्या अभिप्राय है ?

उत्तर–श्रीमद्भागवत शास्त्र के आरम्भ में तीसरा अध्याय भगवान् के सभी अवतारों का सूचक होने के कारण जन्मगुह्याध्याय नाम से प्रसिद्ध है। उन वाक्यों में **'एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्'** (१।३।२८) यह वाक्य तो परिभाषा-सूत्र है; इसका तात्पर्य यह है कि जहाँ-जहाँ अंशावतार सुने जाते हैं उन अंशावतारों को कारणार्णवशायी पुरुष के अंशावतार समझना चाहिये; श्रीकृष्ण को तो स्वयं भगवान् (सर्वावतारी) ही मानना चाहिये। यह प्रतिज्ञारूप परिभाषा सूत्र सभी जगह उपस्थित हो जाता है। प्राचीन विद्वानों का कथन है कि दीपक जिस प्रकार घर के एक कोने में स्थित रहकर भी सम्पूर्ण घर को प्रकाशित कर देता है, ठीक उसी प्रकार परिभाषा शास्त्र के एक स्थान पर स्थित होकर भी सम्पूर्ण शास्त्र को प्रकाशित करती रहती है। वह भी शास्त्र-मात्र में एक बार ही पढ़ी जाती है, बार-बार नहीं। चक्रवर्ती राजा की तरह वह अकेली ही करोड़ों वाक्यों का शासन करती रहती है। इसके विरुद्ध प्रतीत होने वाले वाक्यों की व्याख्या इसके अनुकूल रहकर ही करनी चाहिये। विरोध का परिहार करने के लिये कूर्मपुराण में यह परिपाटी बतायी है—

विरोधो वाक्ययोर्यत्र नाऽप्रामाण्यं तदिष्यते।
यथाऽविरुद्धता च स्यात् तथार्थः कल्प्यते तयोः॥

'जिस शास्त्र में दो वाक्यों का परस्पर विरोध हो, वहाँ पर उसके अन्यतर वाक्य का अप्रामाण्य स्वीकार नहीं किया जा सकता। अतएव ऐसे स्थान में जिस प्रकार दोनों वाक्यों का विरोध टछू जाय, ऐसे अर्थ की ही कल्पना करनी चाहिये।' अतः श्रीधरस्वामीजी ने अपनी टीका में पूर्वोक्त वाक्यों के अर्थ की कल्पना तत्तत्-स्थल पर समाधानपूर्वक की है, वह वहीं पर समझने योग्य है। किं च **'तत्रांशेनावतीर्णस्य'** इत्यादि वाक्य उस-उस प्रकरण में स्थित होने के कारण दुर्बल हैं और **'कृष्णस्तु भगवान् स्वयम्'** यह वाक्य तो श्रुतिरूप होने के कारण प्रबल है। इस विषय में **'श्रुतिलिङ्ग-वाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्'**—यह न्याय ही प्रमाण है; अर्थात्—जहाँ पर 'श्रुति' एवं लिङ्ग-आदि का संघर्ष उपस्थित हो जाय वहाँ पर पूर्वपठित श्रुति आदि की अपेक्षा पर पठित लिङ्ग आदि क्रमशः दुर्बल कहे जाते हैं।

प्रश्न—ताविमौ वै भगवतो हरेरंशाविहागतौ ।
भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ ।।
(श्रीमद्भा० ४।१।५९)

श्रीमद्भागवत के चतुर्थ स्कन्ध में तो इस प्रमाण के अनुसार श्रीकृष्ण को नारायण का अवतार एवं अर्जुन को नर का अवतार बताया है, अतः इस श्लोक के अर्थ की संगति किस प्रकार बैठेगी ?

उत्तर—इस श्लोक के अर्थ की संगति श्रीधरस्वामी के अभिप्रायानुसार श्रीरूपगोस्वामी ने अपने 'लघुभागवतामृत में इस प्रकार बतायी है—

कर्तारौ तु हरेरंशौ नरनारायणाविह ।
द्वापरान्ते कर्मभूतावागतौ कृष्णफाल्गुनौ ।।
(७।५)

तात्पर्य—नारायण और नर ने द्वापर के अन्त में श्रीकृष्ण और अर्जुन में प्रवेश किया । पूर्व श्लोक में कहे हुए श्रीशेषशायी हरि के अंश नर-नारायण को कर्ता समझना चाहिये और कृष्ण-अर्जुन को कर्मस्थानी । **'आगतौ'** यह क्रिया समझनी चाहिये । व्याकरण के ज्ञाता इसको भलीभाँति समझ जायँगे ।

प्रश्न—श्रीविष्णुपुराण में एवं महाभारत में तो श्रीकृष्ण को विष्णु के काले केश का तथा बलराम को उनके श्वेत केश का अवतार बताया है ? इसका क्या तात्पर्य है ?

उत्तर—भूमि का भार उतारने के लिये सभी देवताओं ने जब श्री-शेषशायी विष्णु भगवान् से अवतार लेने की प्रार्थना की तो उन्होंने अपने सफेद एवं काले केश उखाड़ते हुए यह भाव प्रदर्शित किया कि भूमि का भार उतारनारूप छोटा-सा कार्य तो मेरे बाल ही कर सकते हैं अथवा सफेद एवं काले वर्ण के केशों से बलराम एवं श्रीकृष्ण के रंग की सूचना दी है। वस्तुतस्तु भगवान् का श्रीविग्रह निर्विकार है तथा नित्य किशोर बताया है, अतः आधे केश पकना एवं उखाड़ना आदि सम्भव ही नहीं, यह लीला तो आसुरी प्रकृतिके जीवों को मोहित करने के लिये ही प्रतीत होती हैं ।

प्रश्न—द्वितीय स्कन्ध में सभी अवतारों का वर्णन करते हुए ब्रह्माजी ने भी श्रीकृष्ण को आपाततः प्रतीत केश का अवतार कहते हुए **'कलया सितकृष्णकेशः'** (श्रीमद्भागवत २।७।२६)—ऐसा कहा है, इसका क्या समर्थन है ?

उत्तर–इसका समर्थन इस प्रकार का विग्रह करके किया जा सकता है–**'कलया शिल्पनैपुण्यविशेषविधिना'** अर्थात्—**'केश-ग्रथनचातुर्येण सिता बद्धाः कृष्णाः केशा येन'** यानी केश गूंथने की चतुराई से जिन्होंने अपने काले केश बाँधे हैं, वे स्वयं भगवान् श्रीकृष्ण ही हैं; कारण इनकी वेणी गूँथने की निपुणता, रास में श्रीप्रियाजी के वेणीग्रन्थन के समय प्रसिद्ध है; अथवा श्लेषपक्ष में इस प्रकार का विग्रह भी किया जा सकता है—**'सितः कर्पूर-गौरःशंकरः, कृष्णः=विष्णुः, क=ब्रह्मा तेषामीशो नियन्ता इत्यर्थः'** अर्थात् शिव-विष्णु-ब्रह्मा के नियन्ता वे ही श्रीकृष्ण, सित-कृष्ण-केश शब्द से कहे जाते हैं।

प्रश्न–क्योंजी! परमात्मा तो सच्चिदानन्दमय, व्यापक, अपरिच्छिन्न स्वरूपवाला कहा गया है और भाग-विभाग की कल्पना तो परिच्छिन्न वस्तु में ही सम्भव है, फिर इस अंशांशीभाव की व्यवस्था के तारतम्य का क्या कारण? क्यों कि महावराहपुराण में सभी अवतारों को नित्य, पूर्ण, सर्वगुणयुक्त एवं सर्वदोषविवर्जित कहा गया है।

उत्तर– श्रीरूपगोस्वामिकृत – 'लघुभागवतामृत' में अवतारों के तारतम्य के विषय में **'शक्तेर्व्यक्तिस्तथाऽव्यक्तिस्तारतम्यस्य कारणम्'** यही कारिका दिखायी है, जिसका अर्थ है—'शक्ति की अभिव्यक्ति और अनभिव्यक्ति ही तारतम्य का कारण है।' इस विषय में यही दृष्टान्त बताया है कि ग्राम, एवं नगर आदि के दाह के विषय में दीपक एवं अग्निपुञ्ज की शक्ति यद्यपि समान ही है तथापि शीत आदि की पीड़ा को क्षीण कर देने के कारण सुख तो अग्नि के पुञ्ज से ही हो सकता है। अतः अन्य अवतारों में समस्त शक्तियों का प्रकाश नहीं हो पाया है और श्रीकृष्ण में सभी शक्तियाँ प्रकट हो गयी हैं, यही तारतम्य का कारण है। गर्गसंहिता में कहा है कि—

परिपूर्णतमः साक्षाच्छ्रीकृष्णो नान्य एव हि।
एक–कार्यार्थमागत्य कोटिकार्यं चकार ह॥

स्वयं परिपूर्णतम तो भगवान् श्रीकृष्ण ही हैं, दूसरा नहीं; क्योंकि श्रीकृष्ण ने एक कार्य के लिये अवतार लेकर अन्यान्य करोड़ों कार्यों का सम्पादन किया है। अतः चिन्मय परमेश्वर में अंशांशीभाव का भेद विरुद्ध नहीं है।

आलस्यादप्रवृत्तिः स्यात् पुंसां यल्लेखविस्तरे।
इति मत्वैव संक्षेपाद् विषयः प्रतिपादितः॥
श्रीकृष्णार्पणमस्तु!

श्रीहितहरिवंश-महाप्रभोरष्टोत्तरपञ्चशततमे प्राकट्य-महोत्सवे दीयमानं "अभिनन्दन-पत्रम्" वि० सं० २०३८ वै० शु० ११

हितस्य प्राकटच-महोत्सवेस्मिन्, हितप्रदे सर्वजनस्य सम्यक् ।
समागता ये मथुरा-पुरीतो, वृन्दावनाद् ये च महानुभावाः ।।१।।

ये वाऽन्यतश्चैव समागताः स्युः, सुस्वागतं सर्व-जनस्य कुर्वे ।
या मातरश्चैव तथा भगिन्य-, स्तासामपि स्वागतमेव कुर्वे ।।२।।

येषामहं वेद्मि न नामधेयं, न रूपधेयं न च भागधेयम् ।
समागता ये पुरुष-प्रधानाः, सर्वानहं तानपि पूजयामि ।।३।।

स जयति हितहरिवंशो, वंशो येनैव श्रीहरेरपि च ।
हितविधिपूर्वमपूर्वं, संसारेऽस्मिन्नपूर्वतां यातः ।।४।।

स जयति राधावल्लभ, उत्तमपुरुषस्य यस्य सत्कृपया ।
हितहरिवंश-सुवंशः, सर्वत्र वाऽऽशु कीतिमायातः ।।५।।

रसावतारो जयतादजस्रं, महाप्रभुः श्रीहरिवंशनामा ।
नामापि यस्याऽऽशु सुकीर्तितं सत्, सद्वंशतां यापयतीह जीवम् ।।६।।

श्रीकृष्ण-वंशी हरिवंशनाम्ना, रसावताराय मुदाऽवतीर्णा ।
समुज्ज्वलं चोज्ज्वलतां नयन्ती, प्रधानतां तस्य च दर्शयन्ती ।।७।।

गोस्वामिनः श्रीहरिवंशनाम्नो, भक्तेः सुरीतिं नहि कोऽपि वेत्तुम् ।
क्षमो हरेरन्तिक एव राधां, प्रधान-भावेन हि यः सिषेवे ।।८।।

जिह्वा मे तव नामकीर्तनमलं नेत्रद्वयं दर्शनं
कुर्यादङ्घ्रियुगं परिक्रमणकं हस्तद्वयं प्रार्चनम् ।
चेतोऽङ्घ्रि-स्मरणं यशः श्रवणकं कर्णौ च कं वन्दनं
राधावल्लभ ! पादपल्लवतले ते यातु मे जीवनम् ।।९।।

अभिनन्दति रतिपूर्वं, सर्वानत्रागतान् विदुषः ।
श्रीवृन्दावनवासी, शास्त्री वनमालिदासाख्यः ।।१०।।

श्रीमद्भागवत में गोपियों के नाम निर्देश न करने का कारण

सर्वं रहस्यं कृष्णस्य प्रोक्तवान् नारदः पुरा।
वेदव्यासाय विविधान् राधिकाकृष्णयोर्गुणान्॥
गोपयित्वा ततो व्यासः पुराणादिषु केवलम्।
कृष्णलीलां निजगाद न राधासंश्रितां कथाम्॥
नो नः कथा वद सदःस्विति तन्निषिद्धोऽ-
प्यानन्दनिघन इह तावदवोचमेव।
नामानि तु प्रथयितास्मि कदापि नासा-
मित्थं मुनिर्मनसि संप्रति निश्चिकाय॥
—इति श्रीकृष्णकमलतंत्रे लिखितम्

(भा० १०. ३२. ८. तं काचिन्नेत्ररन्ध्रेण० टीका सारार्थदर्शिनी)

श्रीवृन्दावन की महिमा का कवित्त

वृन्दावनधाम! तेरी महिमा को कौन कहे
तेरे जो विहारी जू हैं वे हू याते हारे हैं।
वे ही वनमाली जाकी लीला है निराली अहो!
ते हू बहुबार आप मन में विचारे हैं॥
तेरे तृण फलन को आस्वाद लेन हेतु
स्वयं वत्स ग्वालबाल बनिके पधारे हैं।
ब्रह्ममोह लीला में ये भाव सो दिखाय दियो
याते 'वनमालिदास' तो ही पै जू वारे हैं॥

'दुःसहा बहु-सन्ततिः" इति समस्यापूर्तिः
वस्तूनामतिमूल्यत्वात् स्वभावानाममेलनात्।
स्वोदरस्याप्यपूर्यत्वाद् दुःसहा बहुसन्ततिः॥

मुद्रकः—राजू प्रिंटिंग प्रेस, मथुरा गेट, वृन्दावन